गोस्वामि श्रीगोवर्धनलाल महाराजानाम्

दानलीलाविवरणं पत्र ११४ अंक १५

ग्रं. नं. २

आ. नं. १६

॥श्री कृष्णाय नमः॥ श्रीविठ्ठलपदसरसिजसेवनरसभावनैकसर्वस्वं॥ श्रीमत्पि
१ तृवरचरणाः शिरसि सदा मे विराजंतां॥१॥ श्रीमत्प्रभुचरणाः श्रीमदन्यपूर्वाणां श्रृं
गारचरित्रं निरूपयितुं तदुपयोगित्वेन दानोत्सवप्रस्तावनां वदिष्यंतो नेदमस्मद्भे
दकाव्यं रचिष्यते किंतु लीलास्थेषु नित्यसिद्धत्वाद्यनूद्यते मात्रमतो ह्यशेषसु
कृतोदये रित्यादौ निजलीलास्थभक्तांतरंगसखीनामेव स्वस्वभावोद्गारिवचना
नि भवंति प्रदर्श्यंते स्माभिः परमिति ज्ञापयितुं संपूर्णमन्मथकुंजे श्रृंगाररसमुद्रमि
त्युपसंहारोक्तिसमर्थनाय च लीलास्थजनानां परस्परसंवादसंगतिबोधकं वा
क्यमादौ मंगलार्थं पठंति मुरेत्यादि स्वप्राणाधिसहचर्यः स्वस्वामिन्याः कथां अन्यो
न्यं कथयंतीत्यन्वयः॥ वाक्यादौ श्रीस्वामिनीनामुपन्यासात् तत्वात्स्वप्राणयीत्व

पदेनताएवोच्यंते॥ तेषां च स्वामिनीपरस्नेहास्पदसख्य इत्यर्थः॥ अतएव स्निग्धत
मामिति कथाविशेषणं॥ अतएव प्रमुदिताः कथयंति॥ कथा नाम नाना गुणप्र
काशकवाकूप्रबंधः॥ ता सामानंत्येपि प्रकृतेयो विशेषत्तमाहुः। सरसामिति।
शृंगाररसप्रधानामित्यर्थः। ननु रसकथाहि गुप्ता एव रसतामापद्यतइति सि
द्धेताः गुरुजनादिसमाकुले गृहे कथमेवं कथाभविष्यंत्यतआहुः। निकुंजेषु।
कुसुमशयनीयादिरचितं मुदा चंद्रावल्यासंप्रोक्ता इति सहचरीविशेषणं सहा
समिति क्रियाविशेषणे न स्वसखीषु स्वगूढाभिसंधिसूचनं ज्ञापितं॥ ननु शय्य
नास्तरणादिकर्मसु नियुक्ताः कथं तद्विहाय कथां कुर्वंतीत्यत आहुः। कृत
द्विविधतल्पे क्षितिकुंजविशेषणं॥ तथा चावश्यकसेवां विधाय तथा मङ्ग्या ने

२

गोप्येमाभूदितिपरस्परसमानशीलव्यसनाःकथांकथयंतीतिवाक्यार्थः।स
पदिइतितरानीमित्यर्थेऽव्ययं।तेनसमयविशेषलाभेनतादृशकथासमयस्य
अलौकिकत्वेनवैशिष्ट्यमुच्यतेयद्वा।सपदिइत्यविलंबेतेनसेवानवसरेऽस्म
गोमस्त्रमपिकथांतराधीनंसोढुमलमित्युक्तंकथयंतीतिवर्त्तमानप्रयोगे
णालीलायानित्यत्वंज्ञापितं।एवंसखीनांपरस्परंकथासंगतिंदर्शयित्वापा
श्चिरेसखीप्रोक्तकथासंदर्भमानुपूर्व्याप्रकाशयंतःश्रीमत्स्वामिनीमानिन्याः
गृहाद्विहारार्थंभगवत्सन्मुखागमननिरूपकंसखीवाक्यंनिरूपयंति।अ
शेष्येति।इत्यतःपरंसखीनामेववाक्यान्युपनिबध्यंते।चंद्रावलीव्रजवनेषुवि
हारेच्छयागृहादचलदितिसंबंधः॥वनेष्वितिबहुवचनेनपुष्पफलादिप्र

जो ४

धानानेकगुणपूर्णानंतवनोद्देशप्रकाशनं। विहारेच्छयेति तेन गोरक्षविक्रयनि
र्बंधो निवारितः। निजगृहादिति। निजपदोक्त्या गृहे स्वातंत्र्यमुक्तं तेन विहारेस
मयातिक्रमेपि वैयग्र्याभावः सूचितः भगवत्सन्मुखं स्वामिनीगमनाद्युक्तसमस्त
प्रलीलाकालत्वेनालौकिकत्वं ज्ञापयितुं विशेषतो निर्दिशंति। अहन्यति दिने
इति। अतिमनोहरत्वेनाखंडानंदप्रचुरभगवल्लीलाधारात्मकाधिदैविकः
समयउक्तः। ननु कोयं क्वाप्रसिद्धः कालइति चेदत्राहुः। वेधमानिमित्तइत्यहोवि
शेषणं। विदधातीति वेधास्तेनालौकिकलीलासृष्टिकर्त्रा ब्रह्मणापि जनकेन
भगवतेत्यर्थः। यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति श्रु
तेः। अत्र निर्माणमाविर्भावानुकूलोयत्नः। तथा च लीलासिद्ध्यर्थं भगवताविर्भा

वित्तस्त्यर्थः। तेनलीलानांकालातीतत्वज्ञापनाय स्वस्वरूपात्मकोलोकाः। अत्रैमेद्ध
२ सेवाधिदैविकः कालश्चाविर्भावितइत्युक्तं॥ तादृशलीलाकालस्ययथालौकि
ककालातिरिक्तत्वंतथोपपादितमथसर्वगुणोपेतइति। कालेनव्रजतात्पेनेति
।मयेनारंस्यथक्षपाइत्यत्रैसुबोधिन्यांटिपण्यांच। एतादृशलीलाकालस्यसर्व
स्यापिभक्तसहितभगवल्लीलयाव्याप्तत्वंबोधयितुंतादृशस्थूलकालावयवसू
क्ष्मकालपरिछेदकतयातन्निर्माणसाधनत्वेनवेधसापरिगृहीतानुपाधीन्‌ वि
दिशंति चशेषेति। अशेषसुकृतोदयेनिर्मितइतिसंबंधः। तथाचयथालोके
कलाकाष्ठादिसूक्ष्मकालमारभ्यस्थूलकालपर्यंततत्तत्समयपरिछेदकाउ
पाधयःसूर्यपरिस्पंदास्तथात्रकतेतत्तल्लीलासमयपरिछेदकाःसुकृता

दयाइत्यर्थः। यद्यपिलीलायामाधिदैविकःसूर्योस्तितेनतत्परिस्पंदनांलीला
कालपरिछेदकत्वंसिद्धांतविरुद्धमेवतथापिलीलाधिकरणस्थूलकालाव
यवीभूतसूक्ष्मकालोपितादृशोनास्तियोभक्तानांसुकृतोदयेरपरिछिन्नइत्या
शयंज्ञापयितुंतथोक्तिः तथाचस्वानुगृहीतैःकृतपुण्यपुंजेरंतरंगभक्तैःसहस
दाविहरतीतिज्ञापितं। तेनलीलास्थसामान्यजनानांकालपरिछेदकसूर्यपरि
स्पंदादिनातत्तत्समयव्यवहारेपिलीलास्थांतरंगभक्तेषुतत्सामयिकभक्तसा
हित्येनकृताभिस्तत्तल्लीलाभिरेवतत्तत्समयविशेषव्यवहारइतिभावः यथेदं
व श्रीमपिगोचनाथद्वारेसमयविशेषज्ञापनार्थमुत्थापनराजभोगशयनादिली
लैवतत्तत्समयपरिछेदकतयाव्यवह्रियंतेतद्वत्‌। तादृशसुकृतानांविशेष्य

वक्तुमशक्तिं ज्ञापयितुमशेषेति सामान्यनिर्देशः। ननु सुकृतानामपि केषांचित्स
र्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति वाक्येन दोषसंबंध आशंक्येत तन्नि
रासार्थं सुकृतफलरूपानंतताप्यंतरंगानुधर्मानुकारीत्यातत्परिच्छेदकत्वेन
निर्दिशंति॥ अखिलमंगलैरिति। सुकृतजन्याखिलमंगलैर्निर्मितइत्यर्थः॥
व्याख्यानं तु पूर्ववत्॥ तयोश्चोक्तभगवद्गीतावचनं लौकिकसाधनारंभविषयमिति
तत्तेनालौकिकसाधनानामनुग्रहैककदर्शितानां दोषसंवलितत्वं वक्तुं शक्यमि
ति भावः॥ ननु मंगलानामनंतविधत्वात्स्वाभिलषितप्रकाराभावे हीनत्वं कथं
सिध्येदित्याशंकायां सर्वस्यापि समयस्य भक्ताभिलाषेण व्याप्तत्वं बोधयि
तुं मनोरथस्य परिच्छेदकत्वमाहुः॥ मनोरथेत्यादि मनोरथाभिलाषविषयः

पदार्थस्तस्य शतैरनेकमनोरथैर्निर्मितइत्यर्थः॥ व्याख्यानं पूर्ववत्॥ शतशब्दोऽ
संख्यातवचनः॥ मनोरथानां प्रत्येकमनेकधात्वेन विशेषतो निर्वक्तुमशक्यतां
ज्ञापयितुं मनसि भावितैरिति विशेषणं तथा च नसोऽस्ति समयो यः खलु भक्त
मनोरथविशेषेणाव्याप्तो न भवतीति भावः यद्वा नायं कलाकाष्ठामुहूर्ताद्यव
यवघटितो दिवसः किंतु भक्तानां सुकृतोदय एव तज्जन्यमंगलमेव स्वमनोर
थ एवेति निर्जीयोध्यवसानदर्शनेन सर्वेस्मिन्नपि दिवसे सुकृतादिव्याप्तिश्च
यावंग्यः। सखीशतवृतेति विशेषणादन्येषां दर्शनाभावउक्तः गृहीतानेका
णांयन सखीसाहित्येन नायिकोत्तमत्वं च॥ एवं विहारेच्छया गमनं प्रतिज्ञाय
तावद्देशविहारपरिपुष्ट्यर्थमलंकाररचनावश्यकीति ज्ञापयितुमिदानीं केश

त

पाशमारभ्य चरणान्तखपर्यन्तं स्वरूपशृंगारं वर्णयंत्य आदौ केशपाशं संभ्रुं वर्णयं
तिसमुद्ग्रथितेति। हे सखि कमथ निर्वचनीयं केशपाशं बिभ्रती रेजइत्यादि क्रिया
पदाध्याहारेणान्वयः॥ अथवा वर्णिगुणकं केशपाशं बिभ्रती अचलदिति पूर्व
क्रियान्वयः वसनदक्षेत्यादिवत् केशपाशधारणस्य हेतुत्वं गम्यते। पाशो हि
बंधनसाधनं भवति। प्रकृते च भगवन्मनःस्वाधीनीकरणं विना यथेच्छं लीला
न संभवतीति युक्तमेव केशपाशस्य विहारार्थगमनसाधनत्वेन परिग्रहणमिति
भावः समुद्ग्रथितेत्यादि समस्तं पूर्वार्द्धं केशपाशविशेषणं। सम्यक् यथा निवे
शमुद्ग्रथिता यथा पुष्पाणां म्लानता न भवेत्तथा हि प्रकटमेदः ग्रथिता ग्ररचना वे
भिः स्फुटं रचिताया मल्लत्यादिपुष्पाणामावलीततो गलद्भिरमलैः परागैः

न्मदा वे भ्रमरयूथास्तेनोदितं। गुणगानैकश्रवणवंदीजनैरिव सर्वतो भ्रमरयू
थैः स्वकृतमंगलनादेनोद्घुषितमित्यर्थः। एवं चानेन केशपाशेन प्रिय
स्वाधीनीकरणमनायासेन भावीति सूचितं। उदारमित्यनंतभावपोषकत्वमुक्तं
मृगमदादिभिश्चित्रितमिति विचित्रभावसूचनं। सौंदर्यातिशयं वक्तुं मनोभ
वमदापहमित्युक्तं। इदानीं मृगमदादिनानावर्णचित्रालंकारैराजमानकेश
पाशस्य प्रभातिशयं वक्तुमुत्प्रेक्षंते। श्यामेंदोरिति। इमां स्वामिनीं श्यामेंदोरनुरू
पां तारकामेवाहं मन्ये। श्यामेंदुर्भगवान्। तदनुरूपत्वं तत्समानशीलव्यसनत्वं।
उत्प्रेक्षाहेतुभूतं तदसाधारणधर्ममाहुः॥ यदित्यादि। यद्यस्मात् मेचककेशपा
शात् विचित्रनानालंकृतिविलासमिषेण श्यामेंदोः करनखस्य किरणा इमं

स्वामिनीकेशपाशं इमामितिपादे स्वामिनीवादे सख्यो जातु कदाचिद् अपि न त्यजं
त्यंत स्तथैवेत्यर्थः॥ भगवत्कर्तृकस्वामिनीकेशपाशप्रसाधनादौ क्रीडाविशे
षे च भगवत्करनखस्पर्शस्यावश्यंसंभवात्केशपाशगतविचित्रचित्राणां चि
त्रविचित्रप्रभाराजत्करनखकिरणताद्रूप्येण निरूपणं युक्तमेवेति भावः। अत्रै
वमुत्प्रेक्षणस्यायमाशयः प्रतिभाति। तारा हि बृहस्पतेः स्त्री भवति। सा हि लक्ष्म्यं
शा। रसैकप्रधाना च। चंद्रश्च नारायणांशः। शृंगाररसात्मा च। अतउभयोः प
रस्परं योग्यत्वाच्चंद्रस्तां गृहीतवानिति। तदेतदुक्तं नवमस्कंधनिबंधे चतुर्दशा
ध्याये श्लोके। लक्ष्मीनारायणौ तत्र बुधौ त्रावि निरूपितः इत्यारभ्य स्वकीया
यां रसेनैव ना पितस्याः स्वभर्तरि। अतो रसमयं इदं तारा चंद्रमसौः कृतां सर्वे ६

षां संमर्जितां त्वा गुरुर्बालेस्पृहायुतः अतः पूर्वोक्तिभिः साकं विरोधोन्न भवेत्तथा वमि
त्यं तेन। तदेतद्रसोत्पत्तियोग्यतां परस्परं ज्ञापयितुमेव भगवति चंद्रत्वस्य नायका
यां तदनुरूपतारकोन्वस्य चोक्तिः रिति रहस्यं। इदं च वृत्तचर्याध्याप्रारंभ एव च अ
न्यपूर्वास्त्वन्यथैव न्नतसंस्कारादृत्यादिना श्रीसुबोधिन्यां तद्विवरणे च निरूपि
तं। इदानीं कुंकुमादिचित्राणां केशपाशे शोभातिशयं ज्ञापयितुं प्रकारांतरेणो
त्प्रेक्षते। कुंकुमेत्यादि। कुंकुममलयमृगमदैश्चित्रितानि कुसुमानि यत्र तादृ
शं तदीयं धम्मिल्लं केशपाशो नो भवति। किंतु कुसुमधनुषः कंदर्पस्य तूणीरं श
रासनमेव विधिना सज्जितं संप्रकरणे स्थापितं। अत्र कुंकुमादिविचित्रितकु
सुमानां तूणीरमुखे परिदृश्यमानैः विचित्रशरपक्षैः साम्यमेव तथोत्प्रेक्षायां

बीजं।इदानीं धर्मैः स्नेहकेशपाशममृतजलमेघैरुत्प्रेक्षंते नधम्मिल्लोत्त एवपरि
दृश्यमानो धम्मिल्लो न भवति किंतु मौग्ध्यं सोदर्यं तदेवामृतजलं तन्मुंचति वर्षती
ति तथा तादृशा मलौकिकमेघानामेव निचयः समरा — एवं प्रइत्यर्थः।।किंचा।ध
म्मिल्ले प्रकाशवंति इमानि चित्रपुष्पाणि न भवंति।किंतु त्रिदशपते स्त्रीलास्र.
ष्टिस्याधिदेविकेंद्रस्य मोघ्यो धनुः प्रत्यंचायाः परिणतिः परिणामविशेष एव
।यद्यपि माहेंद्रधनुर्निर्गुणमेव सर्वेत्र वर्ण्यते।तथापि प्रसिद्धमाहेंद्रधनुषः सका
शा अतिरेकं दर्शयितुं अकृते मौही निर्देशः।तेनालौकिकतत्कार्यकारित्वं सूचि
तं।तथा च समोधीक विचित्र माहेंद्रधनुरेव विचित्रपुष्पादिरूपेण परिणतिं प्रा
प्तुवदित्यर्थः किंच केशपाशावलंबीन्यतानि मुक्तागुच्छानि न भवंति किंतु प्र

कटमुक्तमाभः कणाश्च थो निरुक्तामृतजलधरमुक्तास्तेषां भरः समूह एवायमि
त्यर्थः किंच।तत्रैव सुभगतरकाश्मीरोद्भूता रेखा रेखाकारं चित्रं न भवति।किंत्वि
यं तडिद्विद्युदेवेत्यर्थः।।इदानीं चित्रांबरावृतं धमिल्लं वर्णयंति निसर्गेति निसर्ग
मुदरोपि सः धमिल्लः सूक्ष्मचित्रांबरांतरे विलक्षणाश्चमत्कृति विशेषं जनयन्नि
वा दृश्यत अनुभूयत इत्यर्थः।तं चमत्कृत्यतिशयं स्फुटं बोधयितुमुपमानं दर्श
यंति।एतस्या गुदो भावद्धति।तथा च चित्रविचित्रता त्तिगा टनीलकेशपाशमि
वेणानीलमेघश्यामभगवद्विषयकातिविचित्रभावएवांबरेति गूढत्वं नज्ञायत
इति भावः।।इदानीं सीमंते समर्प्पितायाः सिंदूररेखोपरि — तायाः मुक्ताफला
वल्याः शोभामाहुः मत्समर्प्पितेति।मया समर्प्पिता या सिंदूररेखा तदुपरि स्थि

तोमुक्ताफलस्यावलीसीमंते बिभ्रतीसतीबभौ।आलीतिसंबोधनंतादृशशृंगारर
चनाश्रवणदर्शनादियोग्यताज्ञापनार्थं।मत्पदेनस्वस्यांतरंगत्वसौभाग्यचातु
र्यातिशयोज्ञापितः।एवंसामान्यतःशोभानिरूपिता।इदानींमुक्तावलियुतसिं
दूररेखायांशोभाविशेषंदर्शयितुमुत्प्रेक्षंते।नसेति।हेआलिमुक्ताहारयुतासासिं
दूररेखान।अपितुसौभाग्यवारिधेःपूरआभातिइत्यर्थः।अपीतिवितर्केतुःशंका
निरासार्थः।तत्रैवमुक्तावलेर्विशेषंज्ञापयितुमाहुः।सफेनराजिरिति।पूर्वविशेष
णं।फेनसहितपंक्त्याकारेणपरिणतइत्यर्थः।तेनश्रीस्वामिनीस्वरूपंसौभाग्यवा
रिधित्वंज्ञापितं।मुखचंद्रकांतियुतमुक्तावलीकृतंशोभातिशयमाहुः।वदनेति।
मुक्तावलिरिदंवक्ष्यमाणंचित्रमद्भुतत्वपश्यतशृणुतेतिवाध्याहार्यं।किंतदित्य ९

तआहुः।यदितिकचाःकेशास्तेषांनिचयःसमूहःसएवतमोनिबिडांधकारस्त
दपिक्रमेभूतंहेप्रियसखिमुक्तावलिःकर्त्रीप्रकाशयतीतियत्तदतिचित्रमित्यर्थः।
तमस्तिरोभावकस्यतेजसस्तत्प्रकाशकत्वमाहाद्भुतमेवेतिभावः।तदेवाद्भुत
त्वंस्फुटंज्ञापयितुंस्वामिनीवदनचंद्रकिरणैस्तादात्म्यमाहुः।वदनेति।नाय
कावदनसुधाकरकिरणप्रसृतिरूपायाइत्यर्थः।प्रसृतिःसर्वत्रप्रसरणंतथाच
चंद्रकिरणानांतमोनिवर्तकानांतत्प्रकाशकत्वंचित्रमितिभावः।केशानांनिबिडनी
लत्वेनतःसाम्यं।तेनसांद्रनीलत्वातिशयःकेशेषुसूच्यते।इदानींमल्लकाव
लीशोभामाहुः।सुस्निग्धेतिसुस्निग्धासांद्राअमलास्वच्छाःकुंचिताःकुटिला
मेचकाःश्यामाःअतएवसुभगाःउक्तानुक्तसर्वोत्तमधर्मैःसौभाग्ययुक्ताअति

शोभमानाइतियावत्॥ तादृशायेऽलकास्तेषामावलीपंक्तिं हे तरुणि वदनांबुजस्यपरितो बिभ्रती सरोजाक्षी रेजे। इदानींधर्मांतरं दर्शयितुमलकानां भ्रमरत्वं मुखिकमलत्वं वर्णयंति। ईषद्धासेति। हे पंकेरुहाक्षि तदिदं वस्यमाणं भुवने लीलास्यसमाजेऽद्भुत विभाति। तत्किमित्यत आहुः। अलकेत्यादि। अलका एव षट्पदा भ्रमरास्तेषामालिसमूहः स्वाभाविकज्ञांकृतीरपि मुदा विस्मृत्यास्यंदं निश्चलं यथाभवतितथा सततं नाभोजस्य ईषद्धासविकासविभ्रमगलल्लावण्यमधु नित्यं। यत्पिबति तदितदद्भुतं भातीत्यन्वयः। ईषद्धासेति सहजमंदहासो निरूपितस्तस्य विकासविभ्रमः सकांशविलासस्तेन गलल्लावण्यं सौंदर्यमेवमधु मादकमित्यर्थः। अनुगलदित्युक्त्या लावण्यमकरंदस्यातिभर उक्तः। नन्वतिनैकघेनभयादपिवा।

स्वाभाविकाझंकृतीनां विस्मरणसंभवात् किमत्र चित्रतेत्यत आहुः। मत्तापीतिषट्पदालिविशेषणं। तथा च स्वरूपानुसंधानाभाव उक्तः। तथापि स्वाभाविकमुखरत्वस्यानूर्मीभावश्चित्रमेवेतिभावः। अतएवापिशब्दो विसेषद्योतक उक्तः। षट्पदत्वोक्त्या क्रियाशक्तिबाहुल्यं। तेन सर्वथा संभावितस्यापि निष्यंदत्वस्य प्रपन्नेनलावण्यमधुपानजनितमदस्फोत्कटत्वमुक्तं। तेन स्वरूपे लावण्यातिशयो व्यंग्यः। मत्तत्वेप्यमलेति विशेषणात्तज्जन्यमदस्य लोकविलक्षणत्वज्ञापनेनालौकिकत्वमुक्तं। तेनायंमदो न दोषात्मकोपि तु गुण एव भगवत्प्रियंकरत्वादितिभावः। राधासखीतिसंबोधनादत्यंतरंगधर्माभिज्ञतानैपुण्यधौरेयत्वमुक्तं। तेन साधारणानां तद्ज्ञानेऽदुर्लभमितिज्ञापितं। इदानीं स्वामिनीमुखे चंद्रधर्माणामाह्लादकत्ववर्तुल

त्वां दीनं प्राधान्येन स्फूर्तेः कुंतलानां भ्रमरताद्रूप्येणान्वयासंभवात् प्रकृतोपयोगित द्रूपं मुखस्य चेंदुत्वमाहुः नैतदिति। विमलत्वोक्त्यालौकिकचंद्रव्यतिरेकज्ञापनेनालौकिकत्वमुक्तं। तादृशचंद्रसंबंधयोग्यतायै कुंतलानामलौकिकमेव तारकात्वमारूढं ज्ञेयमिति। इत्थं मुखोपरि दृश्यमाना कुंतलमालानां सुषमा न भवति। किंतु सखी दृशां तारा एव नेत्रकनीनका एव। मुखचंद्रप्रभाविद्योतमानानां सुस्निग्धामल कृतत्वात्तां च मत्कृतिवैभवेन दृक्तारकाताद्रूप्यमानमिति भावः। प्रौढभक्तानां स्वरूपस्फूर्तेर्धर्माभिन्नत्वेपि अनेकभक्तसमाजे मुग्धाभावानामपि सखीनां सत्वात् कदाचिदपि सुखरूपाहार्थवर्णनमात्रेण तासां बोधो न भविष्यतीत्यनवधानता निवृत्तिपूर्वकं स्वरूपधर्मानुसंधानार्थं ताः संबोधयंति। हे मुग्धा इति। तेन स्व १०

स्य स्वामिनीस्वरूपविषयकज्ञानस्य प्रौढिः सूचिता। तथा च स्वरूपानुसंधाने वि नैव सम्यगीदृक् रसोननेयः। किंतु स्वामिनीस्वरूपनिष्ठधर्माणामतिगुप्तानामपि तत्व ज्ञानार्थं सुसूक्ष्मेक्षिकया नंदे कतानतया स्थेयमिति मुग्धानामुपदेशो ध्वन्यते। अथवा। मुग्धा हे सुदत्यः तथा च स्वस्वरूपसौलक्षण्येन सर्वासामेव स्वामिनीधर्माभिन्नत्वेन तत्संबोधनोक्त्या स्वोत्कार्षे संमतिरिव दर्शिता। अथवा। तारा विशेषणमिदं। तथा च स्वरूपशोभ्दर्यातिशययुक्तास्तारा इत्यर्थः। तेन निरवच्छिन्नशोभा निरूपिता। कुंतलानां स्वरूपकृता शोभा निरूप्य क्रियाकृतां शोभां निरूपयितुं क्रियाप्राधान्येनोत्प्रेक्षंते। सकमलेति। सकमलयमुनासंबंधिनस्तरलास्तरलशब्देन तरलत्वधर्मप्राधान्येन तरंगा उच्यंते। तेन तरंगानामतिचंचलत्वं व्यज्य

त तादृशेन तरंगादुद्भूतो दनिलाज्जातं यत्कंपितं कंपस्तन्मिषात् अयमलकचयः कंदर्प्प
कोटिशोभां तिरस्कुरुते। यथा कश्चानान्यं तिरस्कर्तुं हस्तं व्यापारयन् तिरस्कारं ज्ञाप
यति तथात्रापीतिभः स्तेनवर्णितगुणपवनेन सकंपालके मुखकमलस्य शोभातिश
यउक्तो भवति। यद्वा तरलेत्य निलविशेषणं तथा च सकमलयमनासंबधीतरत
लउद्भूतश्चयो निलस्तस्माजातंमत्कंपितं तद्व्याजादित्यर्थः भावमहिम्नप्पदार्थस्य
प्रत्यक्षत्वश्चासर्वत्रेदमशब्दस्य प्रयोगः इतः परं ललाटस्थं शृंगारं वर्णयितुमाहुः
विशालेत्यादि विशालेसुलक्षणावति भां ललाटे हिरकंगोणिमणेः स्वर्णेन च
खचितं सुसंस्योया मुक्तास्ताभिः आतं तिलकं दधती रेजइतिपुरो वर्त्तिक्रियया न्व
यः अर्द्धचंद्राद्याकारेण सुघटिते सुवर्णे हीरकादिमणीनतत्तद्योग्यस्थाने नि
रचय्यप्रांतभागे परितो वलं विभिदीडिमीबीजवत्किंचिन्निम्नप्रांतभागैः कुंदस्थू
लकलिकानिभैर्वा सुवर्णनिर्मितछिद्रेषु सुवर्णसूक्ष्मतंतुनाप्रोतैरतिलोलैः स्थू
लमुक्ताफलैश्च रचितं। भूषणं लोकेटीका इति भाषायां प्रसिद्धं तस्य भाले धारण
योग्यत्वविशेषं निर्दिष्टुमाहुः। अलकाक्रांति रुचिरमिति तिलकाभरणविशेष
णं। तथा च केशपाशद्वयांतर्वर्तिसीमंताग्रे संलग्नमेव तद्धारितमिति अतिसूक्ष्मा
लकैराक्रमणं संजाघटीतीति भावः। तत्रैव मृगमदरचितं तिलकांतरं निरूपयं
ति। ततइति ततो रत्नखचिततिलकाभरणस्याधस्तात् तिर्यग्रेखाकारेण रचि
तं मृगमदमयं तिलकं दधतीत्यन्वयः॥ ततोप्यधस्तात् भ्रुवोर्मध्ये दीपकलिका
विभं सिंदूरस्य सूक्ष्मतिलकं बर्त्याग्रमिति दीपेति। ततोधस्ताद्दीपकलिकानिभं

सेंदूरस्य तिलकं दधतीत्यन्वयः। प्रियसखीति प्रेम्णा संबोधयति। स्वामिनीवर्णन
जैनितानंदभरज्ञापमाया चार्द्विति धारणक्रियाविशेषणं निसर्गमनोहरत्वज्ञाप
नाय॥ तत्रैवमुक्ता फलकृतां शोभामाहुः रेजइति कस्तूरीति तिर्यग्रेखाकृति कस्तूरी
तिलकस्य मध्य इत्यर्थः निरूपमत्वं बोधयितुमभूतोपमानमाहुः। चलदिति चलं
तीयाक्कां दिविनी मेघमाला तस्यां राजन् प्रकाशमानो निर्मलोराकापतिर्विधुरिति
मेघमालायां चंद्रमसो भानासंभवादभूतत्वमुपमायां। तथाच। चलंत्यां मेघमा
लायां यदि चंद्रोपि भासेत तदोपमीयेतेति भावः। अतएवं लौकिकचंद्रादिदं वं
कुमभंक्तोक्तिरिति भावः। इदानीं भ्रूलोचनकटाक्षाणां स्वरूपगुणान् ज्ञाप
यितुमुत्प्रेक्षंते। नभ्रूलतेति। सरसीरुहाक्ष्याः सावर्णनीय गुणोत्तमत्वेन प्रसि

द्धः भ्रूलता न भवति विलोचनेन भवतो विभ्रमाः कटाक्षाश्चतेन भवंति। विलोचन
भवतो विभ्रमाः कटाक्षाश्चतेन भवंति किं तर्हीमानीत्यत आहुः। कौमारेति। कुत्सि
तो मारो यस्मादिति वयोगुणउक्तः। तस्मिन्वयसि लीलया नायासेन जितो याका
मस्तस्य मौर्वी बाणधनान्येव विलुंठितानि इत्येवाहं मन्ये इति शेषः। अत्रक्रम
ण भ्रूलता विलोचन विभ्रमाणां मौर्वी बाणधनैस्तादात्म्यमुच्यते। विलुंठिता
नि इति पदं लिंगवचनयोर्विपरिणामेन मौर्व्यादिषु योजनीयं। भ्रुवोलतात्वोक्त्या
यथा लताजालेवेष्टितो निर्गंतुमशक्तः परस्य वशे भवति। तथा भ्रूवोरपि नेत्रश
रसंधानाभावेपि स्वांतं तेनजयसाधनत्वमुक्तं। यथा केचिन्महावीरा बाणनि
रपेक्षा एव सज्जीकृतं धनुः कोटस्य परं वशे नयंति तथात्रापि पक्ष्म मौर्वीक भ्रूधनु

षांशराम्रेरपेक्षेणैव तथेतिभावः। तेन भ्रूलतेत्यत्र मौर्व्युपमानक पक्ष्मसंहितभ्रू
न्निर्देशो विवक्षितः। मौर्वीबाणेत्यत्र मौर्वीपदेन भ्रूपमेयकधनुःसंहितमौर्वी विव
क्षिता। कथमन्यथा भ्रूलतापदसूचितबाणादिव्यापारनिरपेक्षत्वं तेन जयशा
लित्वं संगतं स्यादतउक्त एवार्थः प्रांजलं। अतएवोपदर्शितमेव भ्रुवः सामर्थ्यमिति
शयं ज्ञापयितुं केवलं भ्रुवं वर्णेति त्रिभुवनेति त्रयाणां भुवनानां भूर्भुवः स्वर्लोका
नां जयेऽन्यस्य सर्वोत्कृष्टत्वमदेनाहंकारेण जनितां त्रिवक्रतां त्रिषु स्थलेषु वक्रिम
ध्यावसानेषु वक्रतां हे आलि तद्भ्रूर्बिभ्रती सांप्रतं मधुसूदनं जेतुं व्यग्रेव जयार्थं स
मुद्युक्तेव एव भवणे वाङ्को विराजत इत्यर्थः। चपलत्वोक्त्या जयार्थं परमोत्साहः सू
चितः। तेन मधुसूदनमपि जेष्यतीति ध्वन्यते। सर्वजये समर्थस्येव [illegible]ध्यानं जयप्रयो १३

ह[illegible]यत्ता भवतीति तथोक्तिः। मधुसूदनमिति साधारणोपायैरजेयत्वं सूचितं। [illegible]
पि[illegible]ग्रार्थे सुधमोत्तमा भ्रूमाहात्म्यज्ञापनं परमव्यंग्यं। बिभ्रतीति पदोक्त्या ताद
शजयसूचक चिह्नं सर्वदा धृत्वा तिष्ठतीत्युक्तं। तेन काकुतालीयन्यायेन जय
स्य कादाचित्कत्वं वारितं। भ्रूत्रिविक्रतां सो भगे निमग्नचित्तत्वाद्धि भ्रुवो [illegible]
संबंधं विस्मृत्य भ्रूशोभनासमुद्भूतस्वानंदभरेण परवशतया स्वसमानशीलाम
खीं समनुभावयंत्येवमध्ये संबोधयांचकारेति ज्ञापयितुमालीति मध्ये संबोध
नपदं निदर्शयं बिभ्रतीति क्रियापदमनंतरं निर्दिष्टं इत्यादि विभावनीयं।१८। भ्रूवर्ण
यित्वा केवलनेत्रयोर्वर्णनमाहुः। ज्ञातमिति। हे सखि भगवद्दिषयकनवानुरा
गणवशकाकलानिधिश्चंद्रस्तस्या नायकाया उदितं देष्यति उदयं प्राप्स्यतीति

पूर्वमेवस्तोक्सुखदर्शनेनतः। पूर्वमेवमयोक्तातं अनुमितं। स्वामिनीहृदयाधिकरणक
नवानुरागोदयोभाविखेनानुमितःत इत्यर्थः॥ तादृशानुमितिकरणीभूतलिंगप
रामर्शमाहुः। यत्तस्येति यद्यस्मात्तस्यनवानुरागचंद्रस्यसंरागारुचिराचकोमल
करश्रस्तिर्नेत्रद्वये प्रकटाबभूवास्तथेत्यर्थः। भाविचंद्रोदयव्याप्यकोमलकर
प्रस्तुतिज्ञानस्य लिंगपरामर्शात्मकस्यसत्वात्तथानुमितिर्युक्तैवेतिभावः। नेत्र
योविशिष्टकोमलारक्तरेखावत्वमुक्तं॥१९॥ इदानीनेत्रयोर्दैर्घ्यंवर्णयंतिप्रियये
ति। हे मृगीदृशे ययात्वविद्यया अनंगो विजितो भवतितां विद्यांनेत्राभ्यांश्रु
तिद्वयेशनैरुपैवोपदिशतः उपदेशात्मकोमंत्रःकर्णसमीपसमागत्येवाचा
र्यैर्गायाद्यनेइतितथेत्यर्थः। तेननेत्रयोःकर्णांतप्रांतत्वमुक्तं। सुद्योरुक्षीका

रा२ न१ २४

२२

सामर्थ्यंच। नेत्रयोर्वस्तुशक्तिप्राधान्येनाचर्येलोक्तिः। यद्वा नेत्राभ्यांस्वामिनाभि
वीघस्वविद्ययाकर्णभूतयापूर्वमनंगोवीजितस्तांविद्यामद्यमधुसुदनजयार्थं
श्रुतियुगेनायकामुपदिशतइत्यर्थः॥२०॥ इदानीनेत्रयोरीषद्वक्रप्रांतत्वंवर्णु
मुत्प्रेक्षंते जगंतीति। श्लेष्मालितस्यादृशोजगंतिजेतुंचलितेसत्यांश्रवणद्वयेन
मार्गावरोधेसति। विजयार्थगमनकालेश्रवणद्वयेनमार्गावरोधेसतीतियेयु
त। तदास्वगतिकुंठीभावशंकयासरोषंयथास्यात्तथाउन्मार्गेप्रवृत्तइववरेजतु
रितिसंबंधः॥ उन्मार्गेप्रवृत्तिज्ञापकंतद्वममाहुः॥ वक्राश्चलद्इति। दृशोविशेष
णं। जगतांजयस्यतत्स्वामिजयंविनाःसंभावितत्वेनलीलाप्रपंचस्वामिगोकुले
द्रजयस्याक्षिप्यते। चलितइतिग्रामिकसंभारविनास्वरूपेणैवसाहजिककार्या

र्थे प्रबलेन निवर्तापनादेतस्या जगत्त्रयजयो नातिभार इति सूचितं। ततो नायकेन
तत्स्वामिजयः आक्षिप्तः॥ श्रवणद्वये पदेन श्लेषात्मकमेतन्निर्मर्यादाप्रतिपादकं का
ण्डद्वयात्मकश्रुतिकोटिद्वयमुच्यते। तत्र काण्डद्वये पितृतत्फलनियामके भगवत्ये
व स्वतन्त्रेश्वरत्वमसकृदाम्नायते। इदानीं स्वामिनीनयनयोर्भगवज्जयार्थं प
रमोद्योगं दृष्ट्वा भगवज्जये काण्डद्वयोक्तामर्यादां पर्गमिष्यतीति शंकया श्रुतिभि
कृते यथा बोधे प्रमाणबलापेक्षया प्रमेयबलस्यैव ज्यायस्त्वात्स्वरूपबलेन तथा
रुन्मार्गे प्रवृत्तियुक्तेवेति भावः। सरोषमित्युक्त्या यथा लोके तिनिपुणः कदाचि
दृजुमार्गावरोधे प्युमार्गेण शीघ्रमेव गंतव्यं देशं प्राप्य स्वचिकीर्षितं साधयति।
तथा प्रकृते प्युन्मार्गेण स्वचिकीर्षितजयो द्रागेव विधेय इति ज्ञाप्यते। उन्मार्गे

ण पिधृत्वाद्रुततरमेव जेतव्यमित्युत्साहपूर्वकजयं प्रतिज्ञां सूचयितुं वञ्चांचक्रो
रेतुतुरिति शेषभातिशयतङ्कः॥ न हि निरुत्साहस्य दीप्तिः संगच्छत इति भावः। त
स्मादृजिभुवे सौभाग्याधारत्वेन प्रसिद्धाया इति संबंधजो लक्षरङ्कः॥ इदानीं सांज
ननयनयोः शोभातिशयं वर्णयन्ति। परिधायेति। अंजनमेव कंचुकं परिधाय यापा
गबाणैः श्रवणोदरीसंस्थं मदनमेव मृगं हन्तुं तल्लोचनएव मृगयूपारधी तिष्ठ
स्यतः अतएव लोचनयोराकर्णप्रांतत्वमिति भावः। श्रुतिदरीसंस्थमिति श्रु
तौ तस्करता स्थितेत्यादिवद्भिः सर्वेषामगोचरत्वात् श्रवणमात्रकथावशेष
एव स्थित इति भावः। अतएव हननेन विचारः। वार्तामात्रशेषस्य पराजितस्य दीनत्व
मवलम्ब्य कथंचिद्वक्ष्यतथा स्थितस्योद्यम्य हननेवीराणां प्रवृत्त्यभावादित्या

शयः।यद्वा।कामस्यबहुशः पराजयेनयायास्तत्कथाःस्तासर्वाश्रुपिस्वजयख्यापनार्थमेवोपयुज्यंतइतिकथामात्रेणतिष्टत्वित्याशयेनविचारणदीक्षेनतुहननमिति भाव॥२२॥इदानींश्रवणयोस्ताटंकशोभांवर्णयंति॥श्रवणयुगलइति॥अस्याःश्रवणयुगेताटंकेविरेजतुरितिसंबंधः।ताटंकयोर्विशिष्टतामाहयितुमाहुः।विचित्रेति।विचित्रायेमहामणयस्तेषांप्रकरःसमूहःकनकंचतत्संघटनार्थंजदुर्भूतप्रभाभिर्जितोभास्करःसूर्योयाभ्यांतेतथेत्यर्थः।विशेषणांतरमाहुः।मदगजेति।मदगजभयंतिरेणवर्णयंति।नभूरिति।स्पष्टंपरिधीयाजनेत्युत्तदनंतरंचैतद्वाक्यंपाठेतुमदनहननाभावेहेतुरुच्यते इतसर्वेष्वस्यदीनस्यहननेपक्षिरिति भियाहन्येनेतिभावः॥तेनकंदर्प्यस्याकिंचित्करत्वज्ञापनेनवर्णनीयोत्कर्षोव्यंग्यः॥२४॥गंडस्थलोपरिताटंकयोःशोभातिशयंज्ञाप।यंतुनिरुपमत्वज्ञापनफलिकांमिभूतोपमांदर्शयंति॥स्यातमिति।यदिद्वौपूर्णबिंबौचंद्रमसौएकपंक्तेस्याताम्।तादृशचंद्रयोरुपरिसंलग्नावेवद्वौदिवाकरावुदयाताम्उदयंप्राप्नुतस्तदारविसदृशताटंकद्वयाक्रांतचंद्रमंडलाकृतिगंडद्वयंवर्णनास्यादित्यर्थः।सरोजाक्षिइतिसंबोधनेनज्ञानशक्त्युत्कर्षज्ञापनात्तादृशदर्शनेसामर्थ्यंज्ञापितं॥२५॥गंडद्वयेकमलपत्राकाररेखावर्णयंति।नवेति।नवकाश्मीरभावितचंदनस्यकमलपत्राकाररेखाविरेजिरे।तेनगंडद्वयेपरमाशोभानुभूयतइत्याशयेनाद्भुतसुषुमासादृश्यमुच्यते।प्रकटाइति।कमलपत्रिकामिषेणखोभेवस्वरूपवतीप्रकटालक्ष्यतइत्यर्थः।कमलपत्राकृतिकाश्मीररेखामंडनेहिभा

१७

लस्यातिलकपार्श्वद्वयमारभ्यनेत्रद्वयप्रांतांजनरेखांसंस्पृश्यमंडलाकारेणकपो
लमंडलयोर्विरच्यते। तथाचतादृशमंडनेननेत्रगतातिरिक्तएवशोभातिशयो
व्यज्यतेइतिज्ञापयितुंमृगदृशइतिनेत्रधर्मप्राधान्येननायकानिर्देशः। यद्वा। प्र
कंपइतिपत्रीरेखाणांविशेषणं। अन्यत्रकुंतलाभरणादिनाकमलपत्रमंड
नस्यकिंचित्संवृततयास्पष्टंदर्शनाभावेपिकपोलस्थलयोस्तुनिरावृतत्वेन
स्पष्टमेवभानात्तथेत्यर्थः। अस्मिन्पक्षेगंडद्वयेप्रकटारेखाविरेजुरइतिसंबंधः।
इदानींनासाभूषणंवर्णयंति। शुकेति। शुकस्यशुकचंचुपुटस्यातिलकुसुमस्य
चमत्कृमपहतीतथा। अत्रउपमानविशेषस्यास्फूर्तौसुंदरत्वेनैवनिर्देशः। सुंदरे
ति। तादृशेनासापुटेऽविदूरेनातिदूरेनवातिसमीपेनासावलंबिमुक्ताफलंद

धतीबभौ॥ आलोलमिति निरंतरंसचलदेवतिष्ठति। नतुकदाचिदपिस्थैर्य
मित्युक्तमतस्वभावंवर्णनं॥२७॥ तस्यैवशोभातिशयदर्शनार्थमुत्प्रेक्षंते। नासा
ग्रेति। हेआलिकमलाक्ष्यानासाग्रगतमिदंमुक्ताफलंनभवति। किंतुआधि
क्यवशेनप्रकटः सुषमारूपामृतस्यस्यंदशवेदं। उदारमिति विशेषणेनशोभा
तिशयवितरणशालित्वमुक्तं। स्यंदइतिस्यंदूप्रस्रवइतिधातोः पचाद्यचिरूपं
॥२८॥ अधरंवर्णयंति। जितेति। अधरबिंबेतनुतररेखाबिभ्रतीरेजइतिसं
बंधः। अधरएवबिंबोबिंबफलमित्यर्थः। तेनलोकोत्तरमिदंबिंबफलमित्यु
क्तं। ननुलोकप्रसिद्धमेवबिंबफलंकुतोनेतदुपमानतयोपयुज्यतइत्यतआ
हुः। जितबिंबइति। तथाचतत्सादृश्यस्यवक्तुमशक्यतयालोकोत्तरमिदमि

१८

तिभावः। ननु सर्वत्राधरो बिंबफलेनोपमीयत एवेति किमत्र लोकोत्तरत्वं येन प्रसि
द्धोपमानत्याग इत्यत आहुः। शंबररिपुशास्त्रगूढतत्त्व इत्यधरविशेषणं। शंबररि
पुशास्त्रस्य कामशास्त्रस्य वात्स्यायनादिमहर्षिप्रणीतस्य गूढतत्त्वं परमोपास्य
दैवतमित्यर्थः। तेन शृंगाररसात्मभगवत्रूपत्वमुक्तं भवति। यथा च वात्स्यायन
शास्त्रस्य भगवत्परत्वं तथोपपादितं फलप्रकरणीयविंशाध्याये रसात्मकस्सुय
कामंद्रतिकारिका व्याख्याने टिप्पण्यां। अत एव रंध्रान्वेणोरधरसुधयापूर्णीय
न्नित्यत्र यथाधिकारं सर्वत्र सुधासंबंधो धुरद्वारे वप्रतिमादितः एतस्यैवानंद
स्यान्यानि भूतानि मात्रामुपजीवंत इति श्रुतेस्तादृशानंदात्मकसुधाधारत
यापितथेति। ननु तररेखाभिरुद्भूतामलो किंकीशोभां स्पष्टं दर्शयितुमाहुर्मुखे १८

खकमलोदरइवेति। मुखमेव कमलं तदुदरं मध्यं तत्सादृश्यवतीत्यर्थः। रुमलो
दरस्थिततातिसूक्ष्मकोमलारक्तदलसादृश्यमुक्तं। अत्र मुखे कमलतादृप्यं भगव
त्करस्य लीलाकमलेनोच्यते न तु प्राकृतेन। एवमन्यत्रापि चंद्रादिसादृश्यमुक्ति
षु सर्वत्र लीलास्य सामर्थ्यं वोच्यते न तु लौकिकमपि किंचिदन्यथा सर्वत्र लौकि
कपदार्थसादृश्यादिनिषेधविरोधापत्तेरितिज्ञेयं॥२९॥ एवं निसर्गधर्मैरधरस्य
कमलोदरस्थदलसादृश्यनिरूपणेप्यागंतुकधर्मविचारे तु विशेषनिविरूप
णाशक्तिं प्रकाशयंति। निसर्गेति। निसर्गस्वभावाद्यो रागो रक्तिमा तेन मनोहर
स्येति निसर्गोत्कर्षः। आगंतुके रुत्कर्षमाहुः। तांबूलेति। तांबूलारक्तरेखाभिः
परितोरंजितस्य न न्वेव मत्यरुणरेखारंजितकमलादिसादृश्यं स्फुटमेवेति।

१९

कथंनिरूपणशक्तिरित्यतोधर्मांतरािणआहुः स्मितेति स्मितंसहजमंदहास्यंस्तेनउ
दितावदयंशाशाः स्फीतावहल्लायेरदांशबोदंतप्रभास्तएवभूषाभूषणानियस्य
सतथोक्तः। तादृशाधरस्यसौंदर्यमवाक्पथं। वाक्पथंनभवतीइत्यर्थः। तथा
चनेदंकमलेसंभाव्यतइतितथेतिभावः। तेनयतोवाचोनिवृर्त्तंते अप्राप्यमन
सासहेतिश्रुतेर्भगवद्रसात्मकानंदरूपत्वमंतीतश्लोकोक्तंसमर्पितं॥३०॥
इदानींमाधुर्यादिवाणीगुणाधिकरणत्वेनाधरस्यस्फूर्त्तावधूरेखाणांरूपां
तरंतर्कयंति। ततुतरेति। घोषभूषणांगीत्वकथनेनभूषणांतरंविनापिसहजां
गसौंदर्यसर्थाभिभूःसकलव्रजालंकरणत्वमुच्यते। वागिति। वागेवामृत
तजलधिश्चस्तस्यस्रोतांसिसूक्ष्मप्रवाहाःएवेत्यवधारणे। एवंनिरूपणेपि १९

दमित्यंतयानिर्णेतुमशक्यमेवास्माभिरतस्तर्क्यतेमात्रमिदमित्याशयेनाहुः। उ
क्तेति। एततसंवादार्थमिदंतरंगधर्मत्ताः सखीःसंबोधयंति। सहचर्यइति। स्वामि
नीसहचर्यइत्यर्थः॥ अतएतदभिहत्वमितिभावः॥३१॥ द्विजान्वर्णयंति। अ
चिरांश्विति। सानायकाद्विजावलिव्यपदेशात् अतिस्थिराअचिरांशुलताबि
द्युल्लताएवयदिबिभर्त्तितयाधारणेनास्माभिरेवंज्ञापते। तदाविनोदकारि
व्रजनाथमनोतिचंचलमपिस्ववशेयत्कुरुतेतद्धिचित्रंनभवतीति। अतिचं
चलाथाअपिविद्युतःस्थिरीकरणसामर्थ्यदर्शनात्स्वामिन्याइतिभावः। वि
नोदकारीतिमनोविशेषणात्वपादक्षिणनायकत्वेनानेकनायकासुरतिःसू
च्यतेतेनैकत्रमनसोदुर्निग्रहत्वंसूच्यते। तादृशस्यापिमनसोवशीकरणे

त्वात्स्वामित्युत्कर्षोव्यंग्यः॥३२॥ अतितेजस्वित्वेनस्वाभाविकीद्विजशोभांवर्ण
यित्वेदानींतांबूलादिरंजितदंतपंक्तिशोभांवर्णयंति। अयीति। कोमलामंत्रणे।
हे प्रियसखि। द्विजावलिरियंनकिंतु। प्रियस्यानुरागएवतांबूलादिरसक्तेनरं
जिता रतिरसामृतस्यस्नेहरसामृतस्य श्रेणायः पंक्त्याकारेणपरिणतिरवत्यर्थः
अत्रस्नेहकलाद्विजानीतिवाक्यमनुसंधेयं। तादृशानिर्वचनीयालौकिकर
सस्थापनस्योपयोगमाहुः। ददातीतितद्रतिरसामृतंसदाहसिमधवायेवद
दासिसोपिमधवोपि अमंदंबहुलतरमनुरज्यतेइत्यन्योन्यंचित्तव्यसिंघगोलि
रूपितः सचस्वस्वसमानगुणत्वेनएवपरस्परंभवतीतिभगवद्विषयमाहुः। रति
सन्नचूडामणिरिति। रतिरसज्ञानांसर्वेषांशिरोमुकुटमित्यर्थः। इदानींधर्मा

तरसंसर्गाद्विजानांक्षणक्षणविलक्षणशोभातिशयशालित्वेनविशेषतो
रूपकेनाशक्तिज्ञापयितुमाहुः। मुखेति। सहासभाषणे श्वेतहास्यमिश्रणे
मुखचंद्रकिरणत्वभानं। सहजसंभाषणेहीरकमणिपंक्तित्वेनभानं। कंद
र्पकीडाघनविशेषेधराहुणिश्चासंपर्केत्यरुणदाडिमीबीजपंक्तित्वप्रतिभा
नमितिविवेकः। अनेननिर्बीजदाडिमवत्केवलरसात्मकत्वंसूचितं। इत्ये
वंप्रतिक्षणमनेकशोभयादरेषुरूपविशेषस्यानिर्धारोभूदित्यर्थः॥३४॥इ
दानीमधरबिंबादधश्चिबुकदेशंवर्णयंत्यस्तत्रैवचंदनबिंदुशोभांवर्णयं
ति। आधिक्यादिति। चिबुकेपारीरंचंदनबिंदुदधतीशुभइतिबुद्धिस्यष
क्तंतक्रियाप्रबंधेणान्वयः। तत्सौंदर्यातिशयंद्योतयितुंलीलासृष्टिविधा

तुस्तत्रक्रियाकौशलमाहुः। विधिना रचित इति। तेनातिनिपुणतया परमादरेण तद्रचनमुक्तं। सामुद्रिकोक्तसौलक्षण्यं दर्शयितुं चिबुके किंचिदुन्नतत्वं दर्शयंस्तस्य तदसाधारणप्रयोजनमाहुः। आधिक्यादिति। अधरनिष्ठसुधाया आधिक्यादधरतः कदाचित्स्खलेदित्येवं शाश्वायाः शंकायां तन्निमित्तभूतया विधिना कर्तृभूतेन रचित इत्यर्थः। ननु तावताधरसुधायाश्च्युतिः कथं वार्यत इत्यत आहुः। तदुपष्टंभ इति। अधरसुधाया उपष्टंभके अधरसुधास्खलनविरोधि भवतीत्यर्थः ॥२५॥ इदानीं पाटीरबिंदुमध्ये जनकबिंदुशोभातिशयं दर्शयितुं बिंदुव्याजेन महतीं स्तुतिमाहुः। अस्मिन्निति। मुखमेवेंदुस्तस्मिन्मुखेंदौ। निरूपितत्वं सप्तम्यर्थः। तथा च एतन्मुखेंदुनिरूपितो मदने २९

कि॰ वराचिबुकमें सखि चिबुकगत स्यामबिन्दु सौन्दर्य॥

डुपद्माते छायाधिकारिताधिकारस्तिरस्कारस्तन्मात्रमेव कलंकितांकलंकोस्ति। अर्थान्मुखेंदौ कलंकः। अथवाधिकरणमेव सप्तम्यर्थः। प्रकरणे चेत्स्वामिनीवदनेंदुनिष्ठनिसर्गोत्कृष्टतानिरूपितत्वस्य मदनाधिकृतकेष्टाभौतेः तथा चेत्स्वामिनीमुखेंदुनिष्ठा मदनेंदुपद्माधिकारनिरूपकत्वमात्रकलंकितास्तीत्येवमर्थं प्रकाशयंती सती चिबुके जनस्य बिंदुं दधती विराज इत्यर्थः॥ मदनेंदुपद्मेत्यत्र मदनस्याभ्यर्हितत्वेन पूर्वनिपातः। अत्र जगत्पूज्यानामपि मदनेंदुपद्मानां धिक्कृते लोकदृष्ट्यातावद्दृयोग्यमिव भानात्कलंकत्वसंभावना। तथापि सर्वपूज्यानामपि मेचकबिंदुसौदर्यानुसंधानदशायां हीनत्वमत्त्वभावेन न्यक्कारास्पदत्वसंपादनादेव तत्कलंकोक्तिव्याजेन स्वामि

न्दुसुरूपलावण्यपरमोत्कर्षसुचनात्महत्तीस्तूतिर्व्यज्यते।अपिच।मुखेंदोकलं
कोत्तयाप्रसिद्धचंद्रनिरूपितपूर्णसादृश्यनिरूपणंत्तायतेप्रसिद्धस्यास्यसक
लंकत्वात्।तथापितेनैवसकलंकेनापिस्वामिनीमुखचंद्रेणचिबुकबिंदुसं
र्ध्यातिशयान्मदनादिन्यक्कारप्रयोजकत्वोत्तयाव्यतिरेकस्सूचितश्चाल्कंषा।त
थापात्तदवस्थएव।मृगाक्षीतिनेत्रगुणवर्णनेनतद्विस्थितिविशेषोप्युक्ता
र्थउहास्वतत्यानिरूपितः॥३८॥सौंदर्यपराकाष्ठांनिरूपयितुंपुनस्तमेववर्णयं
ति।कंवर्णयामिइति।इदंचैतद्रूपंपरमोत्कर्षभूमिकारूपमत्यंतंगूढत्वराद्धंत
सिद्धमितिसर्वाभिःसमाहितमनसावगंतव्यमित्याशयेनसर्वाश्चमिसखीःसं
बोधयंतिदिशंति।हेसख्यइति।स्वसिद्धांतितमिदमुच्यतेइत्याशयेनाहुः॥मन्य

इतिपरासेकशिरोमणिमाधवमनएवतल्लग्नमित्यहंमन्यइत्यर्थः॥चिबुकस्थबिं
दुरूपविशेषणोवेकुमंशाक्यमितिसामान्येननिर्देशुं।तरितिनपुंसकनिर्देशः।नं
दनुत्रस्यधवमनःसंबंधेकःप्रसंगइत्यतोरसिकशिरोमणीतिमाधवविशेषणमु
क्तं।रसिवेदंतीतिरसिकारसविशेषभावनाचतुरास्तेषांशिरोमणीरसैकरूप
त्वेनसर्वेषांरसिकभक्तानामुपजीव्यइतियावत्तथाचभगवतोरसंरूपत्वा
द्दृसोपष्टंभकचिबुकेसर्वरसात्मकभगवन्मनसःस्थितिरुचितैव।यद्वाद्विस
वीसामयांसमुद्धएक्कायनंतयासर्वोत्तमशृंगाररसानामयनंहरिरेवसर्वशिर
स्मणित्वादितिभावः।अतएवचिबुकस्यमेचकबिंदुत्ताद्रूप्यमनसःसंगछते।भग
वतःसर्वरसाश्रयहितशृंगाररसप्राधानत्वात्शृंगारस्यसजलमेघश्यामवर्णत्वा

न्यस्मन्मसीपि तथात्वोक्तेः सुवंचत्वादि॥ माधवपदोक्तपारमाथ्यं न तथा मंनीलग्रमि
त्ति प्रकृते स्वामिन्युत्कर्षः॥ यद्वा॥ माधवपदेन निरंतरशृंगाररसशालित्वं सूचितं
। अत एवात्र मनोलग्नमिति भावः। अस्मिन्नपि पक्षे स्वामिन्युत्कर्षस्तथैव। रमायाः
अगाधद्रुसालंबनविभावत्वं यथा तथोपपादितं यथाभकः स्वकीति बिंबविभ्रमं ई
त्युत्रेटिपण्यां॥ २७॥ एवं केशपाशादि श्रीमुखशृंगारं निरूप्य तद्विशिष्टं श्रीमुखं
निरूपयंति किमयमिति॥ अत्र पूर्वं पूर्वस्य तादात्म्यनिरूपकस्य चंद्रादेर्मुखवृ
त्ति साधारणधर्मशून्यत्वेन भाने सति तादात्म्यनिरूपणस्यासंभावेन यथा मुख्य
त्वेन तद्रूमेवमन्यथा परामृष्टेन तादात्म्यं निरूप्यते। तत्र तद्वद्वर्तुलत्वाह्लादकत्व
ज्योत्स्नावत्त्वादि चंद्रधर्माणां मुखे स्फूर्तौ। तत्तादात्म्यं तर्कयंति। किमयमिति॥

अयं सखी जनैर्मुखत्वेन व्यवह्रीयमाणोवयवविशेषः। अमलोराकाधीशः किंभ
वतीति। अत्र सर्वत्र किमिति प्रश्ने। ननु मुखधर्माणां वर्तुलत्वादीनां चंद्रधर्मसज्जे
तीयत्वस्यातेधर्मैश्चंद्रताद्रूप्यनिरूपणं निःसंदिग्धमेवेति संशयमूलकप्रश्नोक्तिः
कथं संगच्छतामित्याशंकायां मुखादन्नविवक्षिता साधारणधर्माणां भ्रमराणां
चंद्रेनुपलंभान्तथा संशयो घटत इत्याशयेन मुखवृत्त्यसाधारणधर्मस्य भ्रमरा
त्मकस्य चंद्रेवृत्त्यभावमाहुः। नतत्रेति। तत्र चंद्रे मधुव्रताभ्रमराः न संति। अत्र तः
मुखस्य कुंतलाएव मधुव्रताः। प्रकटमुपलभ्यंत इति चंद्रताद्रूप्यनिरूपणं कथमेक
ततः सिध्येदिति भावः। तर्हि कमलमिदं स्यात्तत्र भ्रमराणां संभावादित्याशयेन क
मलताद्रूप्यं संभावयंति। कमलमयदास्मेरमिति। अथवेति पक्षांतरे स्मेरम

वेसौरभ्ययुक्तकमलंवास्यात्। अत्रापिपूर्ववत्संदिग्धमेवनिरूपणमितिज्ञापयितुं विकल्पद्योतको वेतिशब्दो निर्दिष्टः। अतसंशयबीजंस्फुटमाह यितुं मुखस्यसा धारणधर्मस्यप्रकृतेविवक्षितस्यकमलेहृत्यभावंनिरूपयंति। तत्राचिराशुलतु स्थिरलत्तोनभवति। नप्रकाशतइत्यर्थः। एवंचात्रतुमुखेहिजावलीरूपदेशादचिरांशु लत्तासंदर्शनान्नेदंकमलमितिभावः। तद्वयमपूर्वः कश्चनमेघएवस्यात्तत्रविद्युल्ल ताभवतीत्याशयेनापूर्वमेघताद्रूप्यंसंभाव्यंति। किममृतमपइति। पंचध कृतमेघेलोकाश्रमिदम्बृ घलवेलक्षणपुर्वभितथापिविद्युल्लता समस्तसाधा रणधर्मेस्यदर्शनान्मेघताद्रूप्यंसंभावनेत्यभिप्रायः। एवंसंभाव्यतन्निरासार्थं खरूपस्यसाधारणधर्माभावमत्रपूर्ववन्निरूपयंति। नतत्रखंजनाविति। तत्रमेघा

धिकरणीभूतसमयेआकाशेमेघेवाखंजनौपक्षिविशेषौनभवतः। एवंचात्रतु नेत्रखंजनयोःस्फुटंविस्फुरणान्नायंमेघइतिभावः। मेघागमेहिखंजनानांशि लेखावरोहेसर्वादृश्यत्वमितिलोकप्रसिद्धिः। इत्थंखल्वित्यत्र...कारेणान्यो न्यधर्मनिर्धारस्याशक्यत्वान्मुखांबुजंकासांसंशयभूःसंशयास्पदंनाभू दपितुसर्वासामपितथाभूदित्यर्थः। तेनविशेषतोनिर्वचनीयत्वेननिरूपम त्वबोधनादलौकिकमेवमुखाब्जमाहात्म्यंसूचितंभवति। २५। इदानींचंद्राद तिशयोत्कर्षंमुखस्यवर्णयंति। सुधांपिबति। चंद्रोह्यमृतसारःहरिर्मानादेवोऽ पमित्यत्रोपपादानात्। योहिसारवान्सोवश्यमसारेणवेष्टितोभवतीत्युपपत्त्या दित्तसारंगइत्यसारभूदित्यत्र। अतोवेधाःसुधांशोःसारंपरितोगृहीत्वातिथले

स्मस्मानायकोयमाश्चाननं विदधेयततो हेतोर्हे बुजाक्षि शोभनज्ञानशक्तिमतित
न्मेंडले चंद्रबिंबे मालिन्यमाभाति। सारांशस्य पृथक्छिन्नत्वादसारांशस्य मालि
न्यं मलिनत्वमाभाति सर्वजनीनं प्रकाशत इत्यर्थः॥ तावता चक्षुः संवादेन तत्र मा
लिन्यं स्थापितं। लोके सकलंकत्वव्यवहाराछद्वेनापि तत्संवादमाहुः। तदिति। त
त् मलिनत्वं यत्तच्चिन्हमिति प्रसिद्धं। चिन्हत्वेन कलंकत्वेन प्रसिद्धमेव लोकाव्य
वहरंतीत्यर्थः। तथा च निष्कलंकोऽयममृतसारभूतो मुखचंद्रोऽयमिति भावः॥ ३९॥
कंठरेखां श्रीकंठशोभां वर्णयंति। स्वरेणेति। हे सखि सा स्वकंठे मनोज्ञरेखात्रयं बि
भ्रती कस्माद्विति संबंधः। रेखात्रयशोभातिशयं ज्ञापयंत्यः संख्यातात्पर्यमाहुः। भा
स्वरेणेत्यादि। कंठस्वरेण भुवनत्रयं स्वामिनीभिर्विजितमित्येवमर्थस्यापि ज्ञापक २९

करेखात्रयमित्यर्थः। इममेवार्थं स्पष्टयंत्यः श्रीकंठस्वरासाधारण्याधिकारण्यं
ज्ञापयितुं विशेषेणमाहुः। तद्गुङ्क्ष्व भुवीति। स्वरो द्रवासाधारणभूमादित्यर्थः। त
था च तद्द्रवस्थानेतावत्संख्याकरेखात्रयधारणेन तथा ज्ञापनं युक्तमेवेति भावः।
। श्रीकंठस्य सहजामेव शोभां निरूपयंति। स्मरस्मयहर इति॥ श्रीकंठस्यासाधा
रणसौभाग्यं ज्ञापयितुं विशेषणांतरमाहुः। व्रजेशभुजभूषण इति। व्रजेशभुजस्य
भूषणं सा वा भूषणं यस्य। भगवद्भुजविशिष्टग्रीवास्मरणेन भगवता समं गानसम
यिकीं स्वामिनीनां स्थितिमभिसंदधाना स्तत्साधान्येन रेखात्रयविशेषणांतर
माहुः। स्वरत्रयमिवेति। स्वरविशेषभावापन्नग्राममतयमिवेत्यर्थः। स्वरत्रयमिव
मनोज्ञरेखात्रयं स्फुटं बिभ्रती बभाविति संबंधः। तत्र श्रीकंठस्वराधिष्ठातृदेवतास्व

राणांधारणाद्लंकारप्रियत्वं भगवन्मिलनोत्सवे परमादरश्च सूचितो भवति। अत एवालंकारविशिष्टस्वरूपशोभा भगवति समर्प्यणीयेति तावदेशपर्यंतं सर्वापि सामग्री श्रमेणापि श्रापणीयेति स्वामिनीभावं प्रकाशयितुं वहंतीत्युक्तं। अत एवालंशोभोक्तिः संगच्छते। हृदयेनानाकल्पधारणावश्यकत्वार्थं मुरो विशेषणमिदं। राधिकावल्लभस्य रतिरणजयभूमावीति। रतिरणः स्मरसंगरस्तत्र कामनृपजेषार्थं राधिकावल्लभेन परिग्रहीता भूमिरियमनेकविधरत्नपंकरालंकृतेत्येवं जंइतिभावः। हारादिसकलभूषणाद्गुंजाहारस्य शोभातिशयं ज्ञापयितुं विशेषणं साह। अतिस्थूलगुंजामणीनां हारं माविभ्रतीति। अतिस्थूलेति गुंजामणीनां विशेषणं। त्वाहारादिसर्वाभरणानां बहिः परितो धारणे प्याकल्पानां च २७

कचित्कृच्छ्रसेन तत्कांतेर्नाभिभवः। किंतु सर्वाभरणानां परितो बहिर्मर्यादा परिधिरिव श्रेथ गेव सचकास्तीति ज्ञाप्यते। अत एवामणित्वोक्तिः। तेन सर्वापेक्षया गुंजामणिहारे तिप्रीतिविषयत्वं सूच्यते। इममेवार्थं द्योतयितुमाहुरतिरुचिरमिति। अथैकिंकं धर्मांतरं ज्ञापयितुं विशेषणांतरमाहुः। उदारमिति। प्रतिक्षणमनेकविधानिर्वचनीयभावातिशयवितरणशालिनमित्यर्थः॥४२॥ उरोजशोभावर्णयंति। मृगमदेति। वाच्यार्थोत्र स्फुटः॥४३॥ धर्मांतरेणोत्कर्षं ज्ञापयितुमुत्प्रेक्षंते। कुचद्वमिति स्पष्टोर्थः॥४४॥ पुनर्धर्मांतरेणोत्कर्षं वकुंरूपकेन वर्णयंति। लावण्यामृतेति। स्फुटोर्थः। खेलत इति विलासं कुरुत इत्यर्थः॥४५॥ धर्मांतरेणोत्प्रेक्षंते रतिरसे त्रिस्फूटेत्यर्थः। सर्वस्वत्वादेवांचलेन गोपनमिति भावः। इदानीं सौंद

यत्खलु रूपमाधुर्यस्फूर्त्तौ वपुमानत्वेन प्रसिद्धानामपि पदार्थानां निरूपमानत्वबोध
२८ नेनानिर्वाच्यसौंदर्यं वर्णयंति। कादिन्येनेत्यादि। सहन्नसह्यन्तुलाकारः। मसृणत्वा
कोमलत्वं ताभ्यां कोकानचक्रवाकान् जिग्ये जितवदिति। सौंदर्यसीमत्व। बोधयं
त्यः किंचिद्विशेषमाहुः॥ सौंदर्येत्यादिस्य ष्टोर्थः। अयइतिस्नेहेन संबोधनं। पुन
स्तत्रैव रूपकोत्तापप्रकारांतरेण सौंदर्यातिशयं दर्शयितुमाहुः। गोपांगनेति। गोपां
गनायां अंगसुषुमेव अमृतसरस्तस्मिन्निदं कुचाब्जस्य युग्मं जातमुत्पन्नमेव सरसंम
न्येइति प्रकृतान्नादेव्यतिरेक उक्तः। तत्र विकासदशायामेव सरसतामाप्नोति न
तु जातमेवेति तिथेति भावः। नन्वसंभावितं कथमिदमुच्यत इत्यत स्तत्कार्यदर्श
नान्यथानुपपत्त्या तमर्थं समर्थयंति। यदिति। यद्यस्मात्कोशोपरि कमलकुड्मलो २८

पर्यपि भ्रमरो दृश्यत इत्यध्याहारेणान्वयः। सरसतामंतरा कलिकोपरि भ्रम
रोपवेशनस्यासंभवान्तदन्यथानुपपत्त्या सरसतानुमीयइति भावः॥ ७१॥ इदा
नीं हारादि सकलशृंगारे परिस्थितां पुष्पस्रजं वर्णयंति। सुवर्णेति। शोभनव
र्णाः त्रियानि सितयुथिकाकुसुमानि। सितपुष्पेपि शोभनवर्णत्वान्नरासित
वर्णेपि मध्येगूढेववर्णांतरशोभाति सुलक्षणावशाद्देतीतिज्ञाप्यते। अथवा
सुवर्णपदेन कनकवर्णोज्वलपीतवर्णयुथिकाकुसुमान्युच्यंते। सितपदेन
यूथिकायामेव श्वेतवर्णकसुमजात्यंतरमुच्यते। तथा च सुवर्णा वर्णा निसितव
र्णानि च यूथिकाकुसुमानि तैर्निर्मितां स्रजं विचित्रवसनांतरे बिभ्रती माधव
प्रियाति शुशुभइति संबंधः॥ माधवपदतात्पर्यं पूर्वोक्तमनुसंधेयं। तत्रैव कुरंग

मत्प्रदिचित्रैर्विचित्रत्वं वर्णयंति। कुरंगेति। विलक्षणमिति विशेषणेनंग्रथनचा
२९ तुर्यातिशयउक्तः। अथवा लोकविलक्षणा। मलौकिकपुष्पनिर्मितत्वे मलोक
विक्षणत्वात्। अत एव विवक्षितोत्कर्षः संभाव्यत इत्याशयेन विशेषणांतरमाह
। विहारमातन्वतीमिति॥५०॥ इदानीं रोमालीसहितोरस्थलस्य शोभां निरूपयं
ति। सुंदरेति। हे सखि कृशांग्यास्तस्यास्तन्वी अतिसूक्ष्मा रोमावली नाभीसरो
रूपैः सुंदरकुचहेमांबुजनालइव व्यरोचतेति। नाभिसरोरुहेति स्त्रीलिंगपाठे
रोमावलीविशेषणं। हेमांबुजद्वयस्यैकनालइत्यभूतोपमा॥५१॥ इदानीं भ
गवत्सन्मुखाभिसरणानुकूलत्वेन भगवदीयालौकिकशृंगारात्मकरसपरिक २९
रकामस्य प्रवेशं वक्तुं प्रकारांतरेण रोमावलीशोभां सूचयंति। तनुतरेति। स्वामि

नीभावस्यनूतनत्वेन कोमलत्वबोधनार्थं तथोक्तिः। यद्वा। तिसूक्ष्मत्वेयांतःप्र
वेशसामर्थ्यमुक्तं। हेसखि उपवर्णितगुणा सा रोमपंक्तिर्नो न भवतीति। किं तु कु
सुमायुधेन तन्वंग्याः हृदये यर्पितस्तनुतरकुवलयदलमयबाण एवेत्यहं मन्य इ
त्यर्थः। इदं त्वत्र ज्ञेयं। हर्षणश्च प्रहसनो मोहनो मुर्छनस्तथा विशेषणश्च कामस्य
शराः पंच प्रकीर्तिता इति भरतोक्तावन्वर्थसंकेतितस्य तत्तद्बाणस्य तत्तत्कार्यार्थं
मुपयोग्यः स्मृत इति प्रकृते प्रकरणवशाद्धर्षणाख्यप्रथमबाणस्यैवार्पणमिति
ज्ञायते। अन्यथा मोहादिसमुद्भवे चिकीर्षितप्रकारेण लीलानस्यादिति। एतेन
भगवत्सन्मुखागतौ परमोत्साहः सूचितः। पुनः प्रकारांतरेण तच्छोभां ज्ञाप
यंत्यपत्प्रेक्षंते। स्वयमिति। रतिपतिर्भगवद्रतिपोषकआधिदैविकः कामस्त

श्री

स्मानःयकायाद्भुदिसरसिवर्त्तमानं मनोमीनं मनएव वा चल्यादिगुणसाम्यान्मी
नंरूपंतद्वशीकर्त्तुंनाभीविवरकुहरस्थःयथाधीवरो मत्स्यवेधार्थंसरोवरतटी
कोटरेस्वडिशंगृहीत्वा विष्ठतितथारतिपतिर्नायकानाभीविवरात्मककुहरेनिम्न
गर्त्तेस्थितःसन्नतिगुप्ततारूपात्मकंवडिशं मीनस्वाधीनीकरणसाधनंनाय
कात्तनौहृदयदेशेनिक्षिप्तवानित्यादिक्रियापदाध्याहारेणान्वयःवडिशंमत्स्य
वेधनं।एवंचतारूप्येननायकामनोवेधयित्वारतिपतिःस्वाधीनंकृतवानित्य
र्थः।तारूण्यप्रवेशेमनसोनानाविकारवत्त्वमेववेधस्तेननायकाचित्तंस्मरत्न
पत्तिपराधीनंजातमितिभावः।ननुवडिशोहिसूत्रेणावलंबयित्वैवमत्स्यगृह
णार्थंनिःक्षिप्यतेनतुगुणरहितोपि।एवंचप्रकृतेसूत्रंकिमत्यपेक्षायामाहः।त ३०

न्मूत्तणेनितंतेःकारणान्मसृणरोमावलिमिषेणस्निग्धरोमपंक्तिमिषेणतल्लु
न्नश्रीराजते।तस्यवडिशस्यसूत्रं।वडिशप्रक्षेपार्थंतदवलंबसूत्रंतस्यश्रीःशोभे
त्यर्थः।जवेनत्वियंपरिदृश्यमानारोमावलीपरिणतिरित्यर्थः।नायकांगएवाल
क्ष्यतयास्थितत्वात्तस्याएवमनसोवशीकरणोद्योगेनधूर्त्तत्वोक्तिः।एवंचानेनस्वका
र्यसाधकोधूर्त्तःस्वमित्युक्त्वाअसहायशूरत्वमुक्तं।विवरकुहरत्वोक्त्यानिम्न
त्वंनाभिगुणउक्तः।तत्रस्थितत्वेनदुर्लक्ष्यत्वंसूचितं।रतिपतिरितिभगवद्वि
षयकस्वामिनीरतिपोषकत्वे।नालौकिकत्वमुक्तं।प्राकृतस्यतुहरेणदग्धस्य
रतिपोषकत्वानैकांत्यात्।अत्रवशीकरणंभगवद्विषयकमात्रकामस्फूर्त्तिः
अतएवतादृशाभ्रैमिककामप्रवेशानात्पूर्वंकौमारावस्थायांतारूण्यंविडि

३१ श स्पर्शः वितरणो मनसश्चो यस्य माहुः। कौमारचपलमिति। अनेककुक्रीडासक्त। अतः केवलं भगवदेकासक्तिहेतुत्वमतत्कामस्य स्वचित्तं। तयाचेदानीमेववयः संधित्यागः स्वचित्तः अतएवतारुण्यवदिशेतिगुणत्वोक्तिः अतिशयतो भगवदेकपरत्वसंपादनलक्षणो गुणो यस्य तारुण्यवदिशस्य लोके विडिशो ष्यति श. यितगुणवान् सन्तेण प्रोतो भवतीति श्लेषोक्तिः ॥५३॥ प्राकारांतरेणोत्कर्षं वक्तुं नेरुरप्रेक्षन्ते। नस्रा रोमावलीति। स्पष्टमिदं ॥५४॥ इदानीमुरस्थलविशेषशोभावर्णनपुरःसरं कटिदेशं वर्णयंति। मत्तेभकुंभेति। हे सखि। वर्तुलत्वोच्छूनबाहुरस्थलरूपो मत्तेभकुंभस्थलमुषमाजनितोयः करिशावमदस्तद्धारिवाहर. म्य शीलत्वं संदेहका गुणोस्यानायकायान भवतिकिमुत किंतर्ह्यन्योगुण इति ३९

मध्ये प्रश्लेषकल्प्योत्तरमाहुः। केसरिगर्वितस्येति। केसरिणः सुजातसिंहस्य यद्गर्वितं गर्वस्तेनैवासनत्वेनाकरशीलत्वमस्यानायकायावर्ततामनुकोपे स्वामिनी गुणायेन सिंहगर्वोपि निवोस्यतद्यत आहुः। इतीति। इतिशब्दप्रयोजनं। पूर्वोक्तप्रयोजनार्थं सिंहजयस्यापयितुमेवेतियावत। मध्येनितंबोरःस्थलमध्ये मृगाक्ष्या अतीवात्यंतमेव कृशमंगं विवरिरः अकारेति ॥५५॥ पुनः प्रकारांतरेणातं वर्णयंति। नतन्मध्यमिति स्फुटमिदं। रहस्यमिति। अतिगोप्यं वस्त्वित्यर्थः सर्वेभ्यो गोपनीयत्वादेव मध्ये स्थापनमिति भावः। भगवतो घनश्यामत्वान्मेचकरोमावल्ली मिषेण तदसाधारणमुद्रात्मकरेखाधारणमित्यर्थः ॥५६॥ नीभिं वर्णयंति। नासानाभिरिति। बुद्धिस्थावस्यमाण

गुणश्री तस्याकुवलयदलाक्ष्यानाभिर्नं। किंतुसुषमामृतसरिद्भायास्तनो
३२ रेवामुमावर्त्तोभवति। स्योदावर्त्तोभसांभ्रमइति। सहचरीतिसंबोधनमुत्कृष्टा
धिकारसूचकं। अत्रावर्त्तधर्मस्फुटमाहुः। यतइति। आवर्त्तरूपत्वादेवास्मा
कंसेतोत्रनाभ्यावर्त्तेपतितंसंबद्धंसदेवनिमज्जत्येव। नचापाततोरमणीये
ष्वासाधारणनामिवास्माकमपिचेतोनिविशतइतिशंकनीयमित्याशये
नाहुः। प्रवतुरतरमपिति। अस्माकमितिबहुवचनात्सर्वासांसंवादोत्रार्थे
निरूपितः। तत्रापिमनस्येकत्वोक्त्यासमानगुरुशालाध्यायिनामिवातिव्युत्प
न्नतयैकमत्यमनेनप्रतिपादितार्थेन्यथाज्ञानशंकाव्यावर्त्यते। इदमिति
स्वस्वानुभवसिद्धंप्रमाणमित्युक्तं। ननुमनसोतिवेगशालित्वेनकथमेकत्र ३२

स्थिरनिरोधइत्याशंकायामाहुः। धृतीति। धृतिधैर्यमुत्साहस्तद्रहितमित्य
र्थः। तथाचमननेस्तत्रसंबंधमात्रेणतद्धर्माणामत्युत्कटत्वदर्शनान्मनः स्वो
द्धारेअसंभवंविनिश्चित्यतदुपायान्वेषणेप्युत्साहाभावएवमनसोवृत्तः। अतो
नुकरणवसाधारणधर्माणांचंचलत्वादीनांप्रचाराभावइतिभावः। वक्तृतस्त
त्क्रियाविशेषनिवर्त्तनेकोतिभारः यतस्तत्संबंधमात्रेणक्रियासामान्याभा
वएवसंपद्यतइत्याशयेनाहुः। गतीतिगतिः। स्पंदसामान्यंतद्रहितमित्यर्थः।
तथाचस्यंदसामान्यभावस्यैवसंपादनात्किमुधिकंवाच्यमितिभावः। एते
नमकेत्वमनःसमाकर्षकत्वात्सौंदर्यपरमोत्कर्षःसूचितः। अन्यच्चतदसा
धारणंकार्यमाहुः। विवेकादिरहितमितिविवेचनंविवेकः तद्धर्माणामवंय

मांतर्ध्येमेभ्यः कियद्दूरमिच्छ्यमिति विवक्षुमशक्यमित्यर्थः। तत्स्मरणादिमात्रे
णोत्पन्नयात्मकसात्त्विकभावाविर्भावा इति गतिविवेकादिशून्यत्वमेव भव
तीति कुतस्तद्विषेशतारुण्ये नेसामर्थ्यमिति तत्वं। नायकावलोकनमात्रेणास्व
दीन्त्वमपि शृंगारोद्बोधश्चैव सात्त्विकभावाविर्भावलक्षणकार्यमत्यद्भुतं नि
रूपितं भवति। आदिपदात् बहिःप्रापंचिकस्फूर्त्यादिराहित्यमुच्यते। अत्र कुव
लयदलास्येति विशेषणात् सरस्तुकुवलकृताशोभायथा तथा त्वलावण्य
भूतेरपि सोच्यते॥ ५७॥ इदानीं परिधानीयनीवीशोभां वर्णयंति। विविधे
ति त्रिय ... अथ रतिपीतदाम्नाशुशुभे। ननु केवलं दाम्नात्तु स्वरूपनीया
त्वर्थशोभा ... कृत्व ह्यिता कांक्षया दाम्ना विशिष्टत्वं निरूपयंति। विवेधे ३३

ति विविधे ... तिर्यक् नकवसनेन तथाऽसंति शोभमाने असिते श्यामे
पट्टे तंतुसमूहो ... मिते पुष्पयुगुच्छे। ताभ्यां लसता विलासयुक्तेन दाम्नात्तथ
... अत्रेदं तत्त्वं। इषद्विकसिता तिसि ... कमलाद्याकारेण सुवर्णघटित
... नीनामरत्नानां यथायोग्यं सन्निवेशेन जटितयोः पुष्पयोः प्रांते केसर
वदलिविलासयुक्ताः सितपट्टनिर्मितगुच्छद्वयं सन्निवेश्य तादृशगुच्छविशिष्ट
रत्नजटितपुष्पयोर्नीवी बंधनार्थे रचितदामप्रांतद्वये निवेशः शोभातिशय
शाली भवति। एवमेवांगदादिषु तत्तत्सन्निवेशनिवेशनिरूपणेप्यूह्यं॥ ५८॥
वितवर्णयंति। अथ इति। अतिप्रणयास्पदत्वेन गूढपदार्थश्रवणार्हत्वाय
कामंत्रामंत्रणं हे सखि। अस्याः ... वर्णयिष्यमाणगुणको नितंबो न भव

त्ति। परंतु विचार्यमाणे मदनप्रियारतिस्तस्याः सदनरूपं यज्जघनं तदुपांते समीपे विधिना भगवता रचितस्तस्या रतेरसौ घर्धनस्य कोशो निधानमेवेत्यहं मन्य इत्यध्याहृतक्रिययान्वयः॥ ननु कथं ज्ञायते कोशोयमित्यत स्तदसाधारणधर्मदर्शनार्थं विशेषणद्वयमाह। यतद्गुरुतर इति। शश्वत् गुप्त इति च। यद्यस्मात् गुरोरपि यष्टी गुरुतरोतिशयेन सुतरां धनभरेण गुरुः शश्वन्नीव्यादिना गुप्तश्च। तस्मात् कोश एवेति भावः। अत्र मदनप्रियामदेन स्वामिनी विषयिका भगवन्निष्ठारतिः परोक्षेण त। उ। मदनप्रियापदशक्यार्थेन रत्या [illegible]नपदवाच्यत्वं रूपसंबंधस्य सत्त्वा [illegible]प्रियेत्यस्य रूढार्थसाधारतित्वस्यैव प्रवृत्तिनिमित्तत्वात्। प्रकृते मदन रूपत्वेन [illegible] रेणोपस्थापनं त्वाधिदैविककामस्य भगवद्रूपत्वस्फोर

35

ण्योस्तु तथा [illegible] स्य भगवतः प्रिया श्रीति जनिका रतिः शृंगार इति यावत्। तत्सदनं तत्[illegible]मीति यावत्। तादृशं यज्जघनं तदुपांते इत्येवं व्याख्या [illegible] मप्यविरुद्धमेव [illegible]वत्। अत एव हरिप्रणयास्पदमित्येतत् कोविशेषणोक्तिः संगच्छते न हि [illegible]कृतकामरतिस्थानं भगवत्प्रणयास्पदं भवितुमर्हति। तस्य सर्वसाधारणत्वेनानुसिद्धभगवद्धर्मत्वस्य वक्तुमशक्यत्वादिति। कांते कुरंगविलोचने इति निरंतरसंबोधनद्वयेन गुप्तार्थश्रवणार्हत्वं ज्ञापयितुं विशिष्टाधिकार उक्तः॥ ५१॥ तत्रैव कांचीं स्तनशोभां वर्णयति। विचित्रेति। विचित्रा ये मणयस्तत्त्वचुरा मेखलीकाचीतत्र गताः संनिवेशं प्राप्ताये मनोज्ञमुक्ताफलप्रवेकाः। मनोज्ञेति। पत्रयज्ञातीयं संनिवेशयितुं योग्यं तत्र तथैव संनिवेश इति ज्ञापितं। तैः कृतो अलसदृशा

मानधर्मेत्वनिबंधनंसादृश्यमेवदधिकलशेनिर्वहति।यदिमुख्योपाध्यनक्त्वमेवात्रवि
वक्षितंस्यात्तदामुख्यसामानाधिकरण्यवाधकमिवशब्दंनप्रयुंजीरंनतस्मादुक्ता
र्थोवदातः।इदानींगोरसकलशिकाधारणेदाक्षिण्यातिशयंदर्शयितुमाहुः।श्रलो
लग्रीवमिति।श्रलोलग्रीवंयथास्यात्तथासासुभगांसुघटितामति।स्वल्पभारांदधि
कलशिकांमुर्द्धिवहंती।स्मितस्मेरंयथास्यात्तथाव्रीडातरलितदृशाकरणेनकांयुव
तीनमुमुहेपितुसर्वमेवयेवतंमोहितवतीतिकाक्कालभ्यते।कानितिहित्तीयावद्धव
त्वनीतपुल्लिंगपाठेसखीजनानितिविशेष्यं।मुहवेचित्ये।वैचित्यमविवेकः।श्रकृते
हिस्वामिनीस्वरूपावस्थितिमद्भुततमोदृष्ट्वास्वस्मेकुदेशकापीदमिच्छामितिविवेच
ननाभूदित्यर्थः।तर्हिताद्दृशमोहस्यमरणेनांखेदपर्येवसायितयानौचित्यमित्या ४२

शंकावारणार्थेस्मितस्मेरमितिमोहनक्रियायांवैशिष्ट्यमुक्तं।स्मितेनेषद्धासेनस्मेरं
सुंदरंयथास्यात्तथामंदहासेनस्वनिगूढाशयस्यकिंचित्सूचनान्मनोसात्वमेवेति
भावः।नन्वेवंगुरुपित्रांधायत्तत्वेनपराधीनेतयाकथंतदननुसंधानेननिर्भयंभग
वदभिमुखाभिसरणमित्यतश्राहुः।तारुण्येति।तारुण्यवयःप्रभवमदादिमान्नि
यामकत्वेनप्रसिद्धानसुरेंद्रब्रह्मादीनपितृणवदेवविगणयंती।श्रवगणनांकुर्वं
तीकांनममुहइत्यन्वयः।सुरेंद्रस्तावदैश्वर्यपरमकाष्ठांप्राप्तःसर्वानैश्वर्येणनि
यमपति।ब्रह्माचप्रमाणबलविचारकः।तदादयः।केचनैश्वर्यबलाःप्रमाणब
लाश्चकेचनसर्वेप्येतद्याप्याएवलोके।तथाचमुख्यनिग्रहन्यायेनान्येभ्योमिति
दूरापास्तेतिभावः।श्रतएवकेमुत्यद्योतकोपिशब्दउक्तः।वस्ततस्तुसानंदगोविंदे

कपरमानसायास्तस्याः कृष्णसेंद्रादिस्फूर्त्तिसंभावनापियेनतत्तुच्छीकरणमपिसंभा
व्येत। तथापिस्वरूपशोदिभरदर्शनादुत्प्रेक्ष्यतेमात्रमितित्तापयितुंतुच्छवदितिसादृश्य ७५
द्योतकवच्छब्दकथनमित्याशयः। आलीतिसंबोधनमत्यंतरंगत्वेनविश्वासार्थ
ग्। एवंकेवलस्वरूपकृतांशोभांवर्णयित्वास्वसखीकदंबमध्येचरणाब्जचालनप्रादु
तांशोभांनिरूपयंत्यस्तदानीमेवभगवत्कर्तृकंप्रथमदर्शनंनिरूपयंति। सखी
शतेती। सखीशतावृत्तावलयकिंकणिनूपुरादीनाममंदंविस्फुटंकलमव्यक्तम
धुरंचयत्सिंजितंतेनांचितयाशिंजितयामनोज्ञयागत्यावनेअचलत्। तदामीवय
स्यसहितोव्रजाधिपसुतोभगवान्अनतिदूरतःस्वल्पदूरात्तांसुंदरीमनांगीष
त्ददर्श सखीतिसंबोधनंस्वामिनीनांभगवद्दर्शनेजानंदसंदोहेनस्वस्यांत्साह

भरंकथनेसूचयति॥७६॥ सकृद्दर्शनमात्रेणभगवच्चिन्तानुषंगंतत्रनिरूपयंति
। चकितेति। चकितनयनंतदाननपंकजंदृष्ट्वादृष्टिमनागप्यादानेस्वाधीनांक
र्त्तुंनप्रशकत्। यतोमाधवःअलौकिकशृंगाररसप्राधानः। किंबहुना। निजस
हचराणां। मांकिंवदिष्यंतीतिशंका। लज्जा। लज्जासापत्रपान्यतः इत्यन्यदृदर्श
नजश्चित्तसंकोचः। अवधानं। स्वरूपवसनादिविषयंकसावधानतापि। हेप्रि
यव्रजसखितदातस्यनाभूत्॥ नन्वतिविचक्षणोभगवान्कथंतथाभवत्तत्रहेतुं
वदंति। प्रियाङ्गसचेतसइति। सहजप्रियात्वात्तथायुक्तमितिसाभिप्रायोक्तिः। च
कितनयनोल्लोक्यास्वामिनीनांभगवद्दिदृक्षातिभरःसूचितः। तावतान्योन्यंचि
त्तव्यतिषंगोनिरूपितः॥७७॥ स्वामिनीदर्शनजसात्त्विकाविर्भावेनरसोद्बोधंनि

रूपयंति।चंद्रावलीति चंद्रावल्याः स्वसखीमुपदिश्य यासहासा क्रिमीवबोधकहा
स्यपूर्ववचनं।ततो हेतोर्गलन्मुखांबुजान्निर्गच्छन्यः परिमलः सुगंधस्तत्संबंधीयो
निलो भगवदंगेषु संगतः संबंधं प्राप्तः सन् साक्षात्संगम इव पुलकरोमांचव्यथा
दिकरोत्।शृंगारो ह्योधकसात्विकभावादिर्भावउक्तः॥७८॥ततो भक्ताभिलाषपू
र्त्यनुगुणं भगवद्विमर्यमाहुः।कथमिति।स्पष्टं॥७९॥विज्ञायेनिर्धारवचनं गोपान्
प्रतियज्ञातं तदनुवदंति।गोप्यइति स्फुटोर्थः॥८०॥ततो गोपबालवचनं तिष्ठत
तिष्ठतेत्यादि श्रुत्वा काचिद्दति विचक्षणा प्रत्युत्तरं प्रावाच।तदुपनिबध्नंति॥तत्रेति।
तत्रव्रजयुवतिकदंबे काचिद्दाक्षप्रचुराति चतुरा बालकान्प्रत्युवाच।तद्वाक्यमाहुः
।किमुरे गोपदारकाइति।रेइति प्रोढिभरेणावगणनया संबोधनं उइति वितर्के।

किमिति प्रश्ने।रे गोपदारकाः किमिति तिष्ठत तिष्ठतेत्यादि वचनैः सानंदमाक्रोश
थइति सांधिक्षेपं कौतुकेन प्रश्नः किमरइति पाठे अरेइति संबोधनं।ततो बाल
का भगवदनुशिष्टाः सविनयमुत्तरमाहुः।नंदनुवदंति।आकारयति वा नंदनंदन
इति।सहि नंदस्याप्यानंददाता।तेन तदाज्ञाकरणे भवतीनां परमानंदाप्तिरेवसेत्स्य
तीत्यवस्यं तदाज्ञानुसर्त्तव्येति सूचितं।ननु नंदनंदनस्यास्मदाकारणे कः प्रसंग
इत्यत आहुः॥गोकुलाधिपइति।सहि सर्वस्यापि गोकुलग्रामस्याधिपइति यु
क्तमेवाज्ञापनमतो भवतीनां पर्यनुयोगः किंनोचितेति भावः।एवं गोपल्लवचनं
श्रुत्वा श्रीकृष्णोक्तमेवानुवदंतीति निश्चित्य भगवदभिप्रायोद्घाटनार्थं स्वेल्यासा
धिक्षेपं पुनर्गोपीनां वचनमुद्भूतं प्रकाशयंति।कथमेवमिति।एवं स्वोत्कर्षख्यापन

४५

प्रकारकंवचनंकथं।केनप्रकारेण।अस्मासुभवन्नियोज्यता।नियामकः।कः।इत्यपे
रोदृष्टोयद्वशादेतन्नियोगमंगीकुर्मइतिभावः।ननूक्तमेवगोकुलाधिपइतिसर्व
व्रजेश्वरत्वेनभवतानातत्कर्तृकनियमनेस्थितिरुचितैवेतिगोपानांपुनःपर्यनु
योगसंभवानायांजातंगोपीनांवचनंनिरूपयंति।वयंकिंवादास्यस्तस्येति।अ
यमभिप्रायः।यदुक्तंगोकुलाधिपइतिसत्यं।वयंचतद्विषयेवसामस्तस्यापिका पा
र्यविशेषगौरवेहिपुरुषाएवाज्ञापनीयाराजभिर्नतुस्त्रियोपि।यद्विकदाचिन्नियो
ज्यास्तदापिदास्यश्चेत्तदानियोज्या।वयंतुतथानभवामइतिभावः।ननुकिमिद
मपूर्वमुच्यते।वयंतस्यदास्योनेति।यतोभगवतस्तुसर्वव्रजनियामकत्वात्त्वंभव
तीनांन्यायप्राप्तंदास्यंकेनबार्यतामितिगोपानांपुनःप्रत्युक्तिसंभावनायांव्रज ४५

रत्नानांवचनंयज्जातंतन्निरूपयंति।कुलांगनाश्री।अयमर्थः।अस्तुभगवतोगो
कुलाधिपत्वंनेतिकोब्रूते।तथापिसाधारणस्त्रीणामेवनकुलस्त्रीणांनियामक
त्वंतस्य।तत्कुलस्यैवतन्नियामकत्वेनस्मरणात्।रक्षेत्कन्यांपितेत्यादिस्मृतिवच
नादित्याशयः।तथाचकुलांगनात्वयोग्यमधिकंब्रुवाणाःप्रामाणिकेरुपालभ्यं
तेतोयावत्प्रतिष्ठाकेनापिनापहन्यतेततःप्रागेवस्वप्रतिष्ठयासहयातव्याद्युध्यस्वा युव्य
मिसविधेगच्छत।अथप्रतिष्ठागच्छतुतिष्ठतुवातन्नोदासीनावयंपरंतुभवतीनीत्वे
वस्वामिनिकटेगच्छामइतिचेदाग्रहस्तदातवेयमुक्तिरस्माकंविभीषिकाभयो
त्पादिकानभवतित्वदधीनत्वाभावादित्यभिप्रायः।अतोत्रैवप्रतिष्ठाहानिर्नेक
न्नेत्युपालंभइवनिरूपितं।अस्माकमितिबहुवचनोक्तिःस्वोत्कर्षख्यापनार्था

४६

तन्वेत्येकवचनोक्तिरपिस्वोत्कर्षपोषार्था।विभीषिकेतिभिभोदेतुभयेयुगितिस्त्रु
।इदंचापाततोबालबोधविषयोर्थःप्रदर्शितःमुख्यहार्दपक्षविचारेतुइत्थंवचन
व्यक्तिःस्तथाहिगोपबालानांतिष्ठततिष्ठतेत्यादिवचनश्रवणानंतरंभगवत्समी
पतःसमागताएतेकिंचिद्भगवदुक्तंकथयितुमेवागताइतितन्मुखप्रसादेननि
श्चित्यतान्संबोधयंति।किमुरेगोपदारकाइति।अतिपरिचितत्वमप्रौढत्वंचम
त्वारेइत्यादिसंबोधनंस्नेहेनापितथासंबोधनेसंभवति।ततोगोपालेराकारयं
तिवोनंदनइतिसमुत्तरितेतादृशंस्वचिरकालविचारितमनोरथानुरूपंवाक्यं
श्रुत्वातिप्रमुदिताःप्राहुः।।कथमेवमिति।एवंकुत्रअत्रैवेमित्यनेनफलविषय
कस्वाभिलाषेयावंतःप्रकारविशेषाश्चिरंस्वमनोरथविषयास्तेसर्वेगोपबा ४६

लद्वारकभगवदुक्तस्वसमाकरणवाक्यतात्पर्यसंवादितयापराम्रश्यंते।कथमे
त्यनेनतादृशस्वाभिलाषपूरकभगवदाकरणेहेतुभूतानांस्वनिष्ठसाधनप्र
काराणांविमर्शउच्यते।तथाचएवंनामास्मच्चिरकालप्रार्थिताभिलषितफ
लप्रकारानुगुणंतात्पर्यकंभगवदाकरणवाक्यमस्मानुद्दिश्ययदिदानींजातं
तत्कथंकेनसाधनप्रकारेणात्रास्माभिर्लाभेनसोत्कंठोक्तिःसूचिता।ननुप्रकटए
वाकारणहेतुर्लभ्यते।तथाहिभगवांस्तावच्छृंगाररसात्माभवत्यश्चशृंगारपोष
कगुणनिकराकराइतिभवतीनांभगवतापेक्षेत्याकांक्षायांयदुक्तंतदाहुः।वयं
किमितिनकिमपिवयमित्यर्थः।नहिभगवतःसर्वेश्वरस्यकान्यूनतायतोस्म
दपेक्षाभवतितस्मात्किंवयमित्यर्थःकिमित्यनादरे।अत्रदिविभुविचरस्ता

यामितिवाक्यमनुसंधेयं।तर्हि किमित्याकारणमित्याकांक्षायांस्वयमेवभुरक्तं।तु
विमृश्ययदूदंतितदाहदास्यस्तस्येति।वयंहितस्यशुल्कदासिकाःसद्यंगीकृत
गोकुलाधिपत्वःकथंस्वदासीरनन्यनिष्ठाउपेक्षते।तदधियत्लांगीकारेप्यर्थो
पातादिति।अतोस्मन्निष्ठंसहजंतद्दास्यमनुसंधायस्वनिष्ठंगोकुलाधिपत्वंचवि
चार्यास्माकंसमाकारणमितिभावः।अत्रदासीनांमदेरक्षार्थंनिमित्तीकृत्यता
दृशंप्रादुर्भूत्तामम्रस्वामीनेश्चिंत्यंवात्विपूर्वंवदितिकारिकादर्शितार्थोनुसंधेयः
।अतएवकुलांगनात्वयं।योहिसर्वेस्वंपरित्यन्यभरावुद्धासंमंगीकरोतिसर्वात्म
नासएवकुलीनास्तस्मान्महत्कुलेवयमेवतद्र्थमेवावतीर्णाःकथमनन्यधर्मे
त्यक्ष्यामइतिभावः।अन्येताःपरंतनुभृतइत्यादिवाक्यान्यनुसंधेयानि।तर्हि

सुतरांशीघ्रमेवगंतव्यंकोविवादइत्याशंकानिवृत्यर्थंमंगनायदमुक्तं।अयमर्थः
वयंहिप्रशस्तांगाभवदीयोपदेशसापेक्षानभर्त्रामातःस्वयमेवस्वांगंभगवन्नि
कटेनेष्यामोतोनास्मांसुनियोगःकर्त्तव्यइतिभावः।तर्ह्यस्माभिरिदानींभगव
दात्तद्वेःकिमनुष्ठेयमित्येवंगोपबालानांप्रश्नेयदुक्तंतदाहुः।यातप्रतिष्ठयेति
अयमर्थः।गोपाहिमोरत्नयःस्ववत्येवसर्वोप्रिप्रतिष्ठांलभते।प्रकृतेसाध्यसा
धनयोरभेदोपचारात्कोधनानिप्रतिष्ठापदेनोच्यंते।तथाचप्रतिष्ठयागोध
नैःसहयूयमितोःविदूरेणवयातगछत।तदानीमेवभगवानस्मासुवयंचतस्मि
न्निर्भरंक्रीडिष्यामइतिभावः।इममेवभक्ताभिप्रायंज्ञात्वाभगवान्गोपालान्
गोचरणेसमाज्ञापयिष्यति।तदग्रेवक्ष्यति।इतिश्रीगोविंदःप्रियवचनमुक्तं

४८

एषैसंभयंतदागोपानात्मपश्दुशतिगोरक्षणंविधाविति। ननुस्वामिनावयंप्र
थाज्ञप्ताश्चतस्तदाज्ञांविनाभवतीनां। नियोगेनतथाकरणेकदाचिद्भगवान्क्रुध्ये
दितिशंकायांयदुक्तंतदाहुः। अस्माकंनतवेयंविभिषीकेति। अस्माकमियंस्त
क्तिर्भगवदाकरणेप्यनागतिवो। तवभगवतःसकाशात्तविभीषिकाभयजनिका
नभविष्यतीत्यर्थः। भगवदभिप्रायंज्ञात्वैववयंतथाब्रूमइत्यस्मदुक्तिकरणेभ
वतांभगवतःसकाशान्नभविष्यतीतिभावः। तवेत्येकवचनमुत्तरकर्तृमुख्यगोप
बालकाभिप्रायेणइदंतुबोध्यं। गोपाश्चस्मद्वाक्यगृहीत्वाभगवत्समीपेगताश्च
स्मदुक्तवाक्यानुपूर्वीप्रकाशयिष्यंतितदाभगवानतिचतुरःस्मद्वाक्याभिप्रायं
स्वतएवज्ञास्यतीत्यभिप्रायेणभक्तानांश्लेषोक्तिरितिगूढाभिसंधिरितिएवंवा ४८

स्मद्वाक्यानुपूर्वीमात्रप्रकाशनेनभगवानस्मद्वाक्यतात्पर्याभिज्ञोस्मदिंगितंज्ञात्वा
भवत्सुनकिमपिदोषारोपंकरिष्यतीत्यभिप्रायेण। नतवेयंविभीषिकेत्युक्तमिति
भावः। एवंपूर्वंदर्शितार्थरीत्यागोपास्तद्विशेषतस्तदुक्तोक्तिश्रुत्वास्फुटंतत्तात्प
र्यंगृहीतुमशक्ताः। किमार्जवेनैतावत्तरंवदंत्युतक्रोधलेशेनवेतिशंकायांभगव
दुपालंभनतोभीताइवपुनःसविनयंकिंचित्प्राहुस्तद्वाक्यमनुवदंति। तवद्यमिति
त्वयंहिभगवच्छिक्षिताःकुलयोषित्सुभवतीषुसांप्रतंसंक्रुत्वानानुचितंवचनंवदा
मस्तर्हिकिमित्याकार्यतेवयमित्यत्रआहुः व्रजनाथेति। व्रजनाथवचनंहिअ
स्माभिर्भवतीभिश्चावश्यंविधेयमतस्तदाज्ञयातथावदामोभवतीभिरपितद्दा
ज्ञापालनार्थमागंतव्यमेवेतिभावःएवंगोपबालकद्वारास्वसमाकारणंनिवे

दर्शनेनं भगवदिंगितनिश्चयेपि स्ववचनद्वारा स्वकीयेंगितं भगवति निवेदयितुं दु
ख्यंतदाकारणप्रयोजनसंगोप्यप्रकारांतरेणप्रयोजनकल्पनयातमेवार्थं सूच
यंत्योगोपबालकाजुंपहसंत्यइवप्राहुः। क्षुधिताः किमिति। ननु निश्चये। अति
बलंक्रीडायांबालकाः क्षुधिताभवंतीतिभवतांक्षुन्निवृत्त्यर्थं गोरसं वहंतीरस्मा
नूदृष्ट्वादध्यादिकं यथड्ड्यादातुं समाकारयंतीति वृक्षैवेशिष्ट्यादस्माभिर्वृंदृंततथा
पिनायंगोरसोभवद्योग्योतोनेवदास्यामोवयं। यदिचक्षुधातिशयेन भोजनं क
तिरावश्यकीतदास्वगेहंगच्छत। अयमाशयः। अयंकिलास्मन्नीयमानोगोरसो
भगवदेकयोग्यस्ततोभगवतेदास्यामोगोपबालैस्तुयदृहेगत्वाभोक्तव्यमितिभा
वः। एतावतायांतुप्रतिष्ठयेत्यत्रस्पर्शितः सूचितोर्थएवमाक्यैः पुष्टीकृतः॥ ५९॥

एवमुक्त्वागोपानीवक्त्रांतरंश्रोतुकामाइवकिंचिदग्रेचलितुंपदान्निधारयंति
यावत्तावत्तापुनर्गोपानांवचनंयदुक्तंतन्निरूपयंति। मायेतितिक्रियया तिरो
धस्यभगवतापूर्वमेवंगोपेषुमाजातुस्पृशतेतिनिषेधाज्ञापनात्प्रकारांतरेणरोद्दु
मशक्ताः शपथंकुर्वंति। वृंदशपथइति। तथापिस्वकीयदेशेयथेष्टगतिंबाधयि
तुंकृत्तोहिशपथोन्यदीयभूमौयथेष्टगतिप्रतिबंधकोनभवतीत्याशयेनभक्तानां
मुत्तरंगोपानप्रतिप्रवदन्तंवदंति। वृंदास्वीत्यादि। वृंदाहिजालंधरस्यस्त्रीभवति।
तदीयमिदंवृंदावनमितिप्रसिद्धं। तदीयंव्रजनाथसंबंधिकथंस्यात्। वस्तुतस्तुवृं
दापिस्त्रीवयमपिस्त्रियोतोधर्मसाम्यादस्माकंपरमिदंवनंस्यादतोस्मदधिष्ठि
तेवनेस्वकीयस्वाम्यप्रथनमेवमनुचितमितिभावः। नवाभवदत्रशपथोत्र

केंगतिंप्रतिबंधप्रयोजको भवति। भवदीयवनेएवगमनस्यप्रतिशेधार्थं शपथकर
णादित्यपिध्वनिः। अतोभगवानस्मदधीनएवगोरसादिकमत्रैवसमागत्ययथेष्ट
निर्भयेनप्राश्नोत्वित्याशयः॥८५॥ ततोव्रजभक्तवाक्येगोपबालकानिग्रहस्या
नंप्राप्ताःप्रस्तुतंपरित्यज्यवितंडयापुनः किंचित्संभ्रमविनयभयाश्चर्यादिभिः केः
शवलितैर्भावैर्यत्प्रोचुस्तद्वचनमाहुः। वक्रिमेति। वक्रत्वमेवदृश्यतेनतुरूजु
तापि। यदुक्तमन्यथावाक्यमन्यथान्येनयोज्यते। श्लेषेणकाकुवाज्ञेयासाव
क्रोक्तिरिति। भक्तास्तुवक्रोक्तिमेवस्वीकृत्योत्तरंप्रत्यूचुस्तदनुवदंति। नत्वलौ
किकमित्यादि। यदुक्तंभवद्वाचिवक्रिमादृश्यतेतद्भवदीयंवाक्यंननुवितर्के
अलौकिकं। लोकोत्तरंलोकेतथावाक्यवदनेनअनर्हो भवति। तस्माद्धन्तिा

सिंचतीतिवद्बाधितंवाक्यंब्रुवंतोनाशायूयमितिनागर्विक्रमोभवद्वाक्यमित्युपहा
सः। सूचितः कथमेवमित्याकांक्षायांगोपाक्रमकेबाधितांशंदर्शयंति। वक्रि
माकिलशब्दस्यधर्मस्तस्यदृशाग्रहइति। वक्रिमैवभवद्वाचीत्यनेनवाक्येनव
क्रिमावाग्धर्मोभवद्भिःप्रतिपादितः। तस्यैववक्रत्वस्यदृश्यतइतिक्रियापदेन
चक्षुषागृहीतत्वंप्रतिपाद्यतेतदिदंलोकोत्तरमित्यर्थः। वाग्धर्मस्यवक्रत्वस्य
श्रोत्रेन्द्रियग्राह्यत्वात्तथाचाक्षुषज्ञानात्मकदृशिधातुनिरूपितकर्मत्वायोगा
दितिभावः। इदमवधेयं। एतेहिगोपबालानसाधारणाः किंतुभगवतोवय
स्याःसर्वात्मनानिरुद्धाः। अतएवैतावत्कालंभक्तैःसहसंभाषणेगोपबालानां
भक्तस्वरूपाधिकारस्फूर्त्याभक्तानांस्वरूपमपिश्लेषोक्त्याज्ञापयंतीतिपरिभा

५९

सर्वत्मैकोयमभावैकाद्वारिदृशहासस्यरूपत्वात्कांत्यामनेहकल्पाद्विजानीतिवाक्यात्तद्वद्धेतिभा
वस्यसर्वतोव्याप्तिरूक्तास्वगतोक्रियथापिस्वकीयेमावोद्बोधनमुक्तं।एवंकतिपयसा
धनोक्तमपिप्रत्यवयवधर्माणांतदानीतदनुकूलत्वेनाविर्भावितानांविशिष्यवर्णन
मशक्यमेवेत्याहुः।किंवर्णितेनेति।विशिष्यतद्धर्मगतप्रकारोवक्तुमशक्योपिसौंदर्य
तिशयस्तत्वव्यभिचारितयासर्वत्रानुभूतोस्माभिरित्याशयेनाहुः।सखिपेशलैःस्वैःसं
मुह्येति।संमुह्येतिभोगभावितार्थोयं।स्वामिनींसंमोहयित्वेत्यर्थः इदंहिमोहनंए
वैवंतत्संघातस्तयासादकंचस्वर्ग।तथासत्युभयत्रैवैर्थ्यथापातात्किंतुयथाकश्चन
मंत्रवादीगारुडादितत्रविन्नामंत्रोषधादिनामार्गेस्थमुदासीनमपियंकंचनंजनं
पूर्वावस्थांविस्मारयित्वास्ववशेसमानयति।तथात्रविवक्षितं।यद्वा।तदानीभगवता ५९

गो॰

स्वामिनीवशीकरणार्थमाविष्कृतैरत्यंतरंगधर्मैःस्वयमेवमोहितोजाततद्धर्माणांनि
रवधिरुत्कर्षःसूच्यते।तथाचसंमुह्यस्वयमेवस्वकीयधर्मैर्मोहंप्राप्येत्यर्थः।तदुक्तं
।विस्मापनंस्वस्यचसौभगर्द्धेरित्यादि।तामितिं।भगवत्समानधर्मत्वेनप्रसिद्धां।अतए
वोत्कृष्टरसात्मकत्वंरसोवैसइत्यादिश्रुत्युक्तंभगवतोनिर्वहति।नहिपरस्परासमा
नेतराभिमुख्यरसाविर्भावःसंभवतीत्याशयेनभगवद्विशेषणमाहुः।।रसिकतांनिधि
रिति।ननुस्वानंदपरिपूर्णस्यलक्ष्मीपतेःसर्वाधीशस्यकान्यूनतायातोत्यंतरंगस्व
धर्मानपिप्रकटीकृत्यात्यंतनिर्बंधेनस्वामिनीवशीकृत्यवचनोदैःप्रवृत्तिरित्यतआ
हुः।नाथइति।श्रीगोकुलस्वामित्वः।सत्यंयद्यप्यस्तिसर्वाधीशत्वादिपरंतुस
र्वस्यधारणमेवततंअत्रतुविशेषतःस्वामित्वस्यांगिकाराद्युक्तंतथाकरणमितिभा

सुधापानस्वामिनीवचनानामवसरप्रदानार्थंतावद्भगवद्वाक्यंनिरूपयंति। कथमि
त्यादि गोरसविक्रयेमेऽस्मदंदानमदत्त्वैवकथंगच्छसीत्यन्वयः। दानंनाम विक्रेयपदा
र्थेषुनीतिमार्गेणग्राह्योराजभोगस्तस्यचाप्रदानेराजकीयैः कथमपिगंतुंनदीयत
इत्यावत्यकंराजभागमदत्त्वाकथंकिंप्रकारमवलंब्यगच्छसीतिभावः। अथाऽमूल्य
मणिप्रवेकाद्यखिचितस्वाभरणवैभवदर्शनेनास्मान्धर्षयित्वागंतव्यमितितुनैव
भिमंतव्यं। यतः सुदृढस्वशापोदंवैभवदर्शनंनास्माकमदृष्टगोचरंयेनधर्षिताः स्व
श्रद्दीतव्यमावश्यकंदानंत्यक्ष्यामइत्याशयेनाह। सिंजित्कांचीति। सिंजितीशब्दमु
खरायाकांचीसैवकलापोभूषणंतेनस्ववैभवंस्वकीयंमहत्त्वमस्माकंज्ञापयंतीत्य
र्थः। तथाचैवंवैभवदर्शनेनसाधारणानांधर्षणेऽपिनास्माकंसकलवैभवविलास ६२

वतां भ॥ धर्षणोपायइतिभावः। अयंचप्रातीतिकोऽर्थो मुख्यार्थविचारेतु। कथमद
त्त्वैवमेगच्छसीतिदानाभावहेतुभूतप्रकारस्यप्रश्नः। अत्रैवेदमाकूतं। केनापिप्रकारेणभ
वतस्तुगोरसस्यदानाभावोनैवयुज्यते। तत्रसर्वेऽपिप्रकाराःप्रमाणादिचतुष्टयेंतर्भवं
ति। तत्रतावत्प्रमाणविचारे। यद्यदिष्टतमंलोकइत्यादि। सर्वसाधारणप्रमाणानि
भगवद्योग्यत्वात्स्वकीयमित्येवप्रतिपादयंति। प्रमाणविशेषविचारेतु। तस्मान्म
च्छरणंगोष्ठमित्यादीनिभगवतीगोकुलस्वामित्वंप्रतिपादयंति। सर्वेमेत्रात्तमव
स्तुजातेमत्रत्यंभगवदेकयोग्यमितिज्ञापयंति। प्रमेयविचारेत्वात्मानंभूषयांच
क्रुरित्यादिवचनादविकृतसच्चिदानंदात्मकंस्वामिनीस्वरूपं। तत्संबंधियावच्च
सर्वंभगवन्मात्रपर्यवसायीतिस्फुटमेव। भगवत्स्वरूपात्मकप्रमेयविचारेऽपि। कृ

स्मः फलात्मा स्वयमुपस्थित इति तमुपेक्ष्य तदीयस्य वस्तुनो ऽन्यत्र निवेदनसंकल्प
मात्रेपि महान्व्यतिक्रमः। साधनविचारे तु श्रुतिरूपास्तु तिसंतुष्टस्य भगवतो दुर्ल
भो दुर्घटः स्वैव युष्माकं तु मनोरथः। मयानुमोदितः सम्यक् सत्यो भवितुमर्हतीति ब
हद्वामनीयवाक्ये। इतरसाधनानां नैतत्फलसाधकत्वं। किंतु मदनुग्रहैकलभ्यमि
दमिति ज्ञापितं। एवं च भगवदनुग्रहादिरूपालौकिकसाधनस्यालौकिकफलपर्य
वसायित्वं कदापि न संभवतीति प्रकृतानुकूलता। फलविचारे तु भगवत्प्रीतिः सा
क्षाद्भगवानेव वा फलं। तदुभयमप्यत्रैव सिद्धमिति न कोपि तादृशः प्रकारो भवन्नी घ्रू
ल्लभ्यते। येन मद्वान्यत्रापि विनियोगः प्राप्यत इति निगूढाशयः। तदेतद् दर्शयितुमु
क्तं। कथं गच्छतीत्यादि। अस्मिन्पक्षे सिंजत्कांचीकलापेनेति विशेषणोक्तेरयमा ४४
शयः। तथाहि वस्तुतस्तु भवती मामप्याशयइत्थमेव प्रतिभाति। यदुचितं दानंत
स्मै त्वयैव गंतव्यमिति। कथमन्यथा कांच्यादिशृंगाररचनां कृत्वा निर्जने वने
समागमं संभवत्यतो मह्यं दर्शयितुमेव शृंगारादिरचनावैभवश्चैकमत्रसमाग
तमिति भावः। तदेतदुक्तं सिंजत्कांचीकलापेन दर्शयंती स्वं वैभवमिति। स्वामि
न्यस्तु भगवद्वाक्यतात्पर्यं ज्ञात्वापि तत्कथनं विहाय भगवन्निगूढाशयोद्घाटना
र्थं स्वचातुर्यचमत्कृतिं च दर्शयितुं कथं गच्छस्यद्य त्वं वेति वा क्वास्य कथं गच्छसीत्ये
वं गमनक्रीयाप्रकारविशेषप्रश्नपरत्वमुद्भाव्य वक्रोक्त्या तदुत्तरमाहुः। इयुद्व
धीति। हे सुभंग सर्वांगसौंदर्यादिसर्वसौभाग्ययुक्तेयद्वधि एतावच्चिरकालमेक
त्रैवास्तां पि मदीयाभ्यंतरपि ते त्वया नावलोकितेति महाश्चर्यमिति भावः। मदी

स्वा

मेत्यनेनास्वगतावसाधारणत्वमुच्यते। तथा च यथा भवानतिसुभगस्तथा मद्रूपमह
पा गतिरपि सुभगतरेत्यवश्यं द्रष्टुं योग्यापि न दृष्टेत्युपहासपूर्वकोपालंभमिव सूचयं
त्यः स्नेहातिभरेण सदा भगवत्स्वरूपानुसंधानं स्वस्य ज्ञापयंति। अपि शब्देन निगू
ढस्वकीयधर्मान्तराणां तु सुतरामेव भगवतोननुसंधानं सूच्यते। तेन महानेवाय
मनं योभवत्सु दृश्यते यदहर्निशं भवत्स्वरूपैकनिष्ठानामस्माकं गतिमात्रमपि
नावलोकितमिति सहासस्वेंगितप्रकाशनेव्यज्यते। अत एव मदीयेत्यनेनाऽसा
धारणतया स्वकीयस्वरूपं तिर्दृशेन भगवदेकतानत्वलक्षणः स्वकीयोसाधार
णधर्मो दर्शितः। तमेव स्फुटं ज्ञापयितुं भगवतोनवधानं तां निवर्त्तयंती मदीयाग
तिं पश्येति नियोगं कृत्वा इत्थमनेन प्रकारेण मदीया गतिरस्तीति वदंती प्रतिज्ञा

मेति। क्वचित्पदान्यस्खलत्। भगवत्सन्मुखमगच्छत्। एतावतास्माकं सर्वदा त्वत्सन्मु
खैव गतिर्न तु विपरीतेति सूचितं। अत्रैव परोक्षवादमाश्रित्यार्थो वर्णनीयः। तथा
हि। इयदवधीति सकलपुष्टिश्रुतिरूपाधिदैविकायाममसर्वदा भवदेकपर्यवस
नैव गतिरस्ति। सापि किं नावलोकिता भवतेत्याश्चर्ये। अथ सर्वाभिज्ञोपि भगवान्
कदाचिदस्मत्प्रेमपरीक्षार्थमेव तथा वदतीत्याशंकायामेवार्थं स्फुटीकर्तुं पश्येत्युक्ते
सति यं पश्यतीति वदंती क्वचित्पदानि स्मरयंती सती भगवत्सन्मुखमचलत्। क्व
चिदित्यनेनोपलक्षणविधया श्रुतीनां सर्वासामपि गतिर्भगवत्सन्मुखैवेति ज्ञा
प्यते। किंच। क्वचिदित्यनेन भगवत्सन्मुखं गमनं तावन्नातिदूरे नात्यंतं निकटे
पीति ज्ञाप्यते नेन श्रुतयोपि यथासामर्थ्यं भगवदिच्छानुसारेणाविदूरं विप्रकर्षेण

वाभगवंतं निरूपयंति न त्विदमित्थंतया कात्स्न्येन निरूपयितुं शक्ता। अंते भगवा
ननुग्रहेण यावत्स्वरूपं ज्ञापयति तावदेव निरूप्यते स्माभिरिति गूढाभिसंधिः। त
था च श्रुतिः सर्वे वेदा यत्पदमामनंतीति तं त्वौपनिषदमिति। यतो वाचो निवर्तंत इ
ति यस्यामतं तस्य मतमित्यादिका इत्थं वेदेत्येवमादिकास्स्मयंतीत्यनेनोत्साहेन
तात्पर्यपूर्वकं भगवद्वक्त्रान्मुखं गमनमिति ज्ञापितं॥ एवमेव श्रुतयोपि तात्पर्यपूर्वकमे
व भगवंतं निरूपयंति न त्वापाततः इत्यपि सूचितं। भगवांस्तु तत्स्वामिनीगतिविशे
षेण वशीकृतस्तामेव चरणगतिं पुनः स्फुटं द्रष्टुकामः कौतुकेन किंचिदुक्तवान् न त्व
हमेव तं निरूपयंति। न सम्यगीति। अत्र वाच्यार्थः स्पष्टः। परोक्षवादपक्षे त्वयमाश
यः। अंतःस्थितत्वादात्पूर्वं यथा कथंचिच्छ्रुतिभिर्मत्स्वरूपं निरूप्यते। परं नेदमित्थं
स्व

गि=२

स्वरूपधर्माणां सर्वेषां कात्स्न्येन तदानींतनाप्रकटनाद् अत एव यतो वाचो निवर्तंत इ
त्यादिकाः श्रुतिरुपपद्यते। नाहं वेदैर्न तपसेत्यादिस्मृतिश्च। अतस्त्वदीया गतिरि
यं सयावल्लोकितापरं त्वियं गतिर्न सम्यक्। अदूरं विप्रकर्षेण यथा कथंचिन्मोहः
त्यल्पनिरूपणेपि पूर्णस्वरूपस्यानिरूपणात् फलपर्यवसायिनी नेत्यर्थः। अत इ
दानींतु भवदर्थमेव तत्स्वरूपप्रदर्शनादत्यंतरंगशृंगारधर्मा न तु नैकदेशेनानु
भूयस्तु स्वरूपं पुनः प्रकारांतरेण शृंगाररसप्रधानतया निरूपणीयमिति पू
र्वगतितो विलक्षणमेव इदानीं दर्शयेत्यर्थः। इदमेवोक्तं। मनाङ्निकटमायातानिज
गतिं पुनर्दर्शयेति। अत एवाक्षरवतां फलमिदं तत्परं विदाम इत्यादिना तत्तत्का
रेण प्रमेवोत्कृष्टतया रसात्मकं भगवद्रूपमनुभूय निरूपितं श्रुतिरूपाभिः ततो

ते। एवं विधवाक्यद्वयैकार्थता विचारे मुख्यं गोरसदानं तदनुयद्यद्रंगं गोरसविक्रयार्थं सा
क्षात् प्रियते तद्दानं चाभिप्राय विषय इति प्रतीयते। तादृशांगविचारे च वृंदावनादिभू
मौ गोरसविक्रयार्थं गंतव्यं। तत्र साधनत्वं चरणस्येति तद्दानमेकं वक्तव्यमित्याशयेन
चरणा इत्युक्तं। कलशिकायामपि गता वितस्तत श्चलनं माभूदिति तदर्थं हस्तापित
त्वेऽपि प्रियतद् इति करे वेत्युक्तं। वस्तुतस्तु नेयं दानरीतिः किं चित्सिद्धे तिनिष्कर्मिन्नेव वाऽयं
दानग्रहणोद्योग इत्यस्मिन् प्रस्तावे बंधमेवात्र रंदेयमित्याग्रहो न रक्षणीयः किंत्वसंव
द्वेयं दानग्रहणप्रस्तावनेति तथैव यथा कथं चित्तद्वक्तव्यमित्याशयेन पश्चादित्यु
क्तं। मुख्यपक्षे तु। पश्चादित्यनेन समयांतरमुच्यते तथा चेदानीं सर्वसमक्षं वक्तुं संको
चश्चेत्तर्हि पश्चादेकांतसमये वद् वक्तव्यमित्यर्थः। शेषं स्पष्टं। एवं सर्वथा भक्तानां दान

ग्रहणरीत्यस्मादृश दानग्रहणनिर्बंधे हेतुमप्रच्छन्। तद्वाक्यमुपदर्शयंति। गोकुलेशेत्या
दि पूर्वार्द्धेन गोकुलेशत्वात्त्वत्तो गृहस्थेन कर्तव्य इति सूचितं। न ह्यधीनः स्त्रीषु व
लं प्रदर्शयतीति। अत एवास्मानिति विहाय स्त्रीय इति सामान्यवचनमुक्तं। अ
त्रैव स्थितिज्ञापनपक्षविचारे तु। स्त्रियोऽस्मत्सार्थं समागत्ता गृहं गंतुं कृतान
स्मर्यमीति योजना तथा च केनचिन्निषेधेन तद्रसानधिकृता स्त्रियः स्वगृहे
प्रेमरणीयास्तत्रैवांतरंगसखीजने तु तिष्ठन्तु यथाभिलाषं कर्तव्यमिति भावः
अत एव स्त्रिय इति सामान्यवचनं स्वांतरंगसखीभिन्नाभिप्रायेण। यद्यप्यत्र स
र्वोऽपि स्त्रीकदंबः सर्वथांतरंग एव तथापि भगवतः प्रथमदर्शने तावल्लज्जाभयादि
ना तथा स्वामिन्युक्तिः संभवतीति नानुपपत्तिः का चित्ततो भगवद्वुत्तरंयजा

तंतन्निरूपयंति।हंसवनइति।हंसवनभूमौ मृगदृशां नायकोत्तमानां दानं लगति।म
त्स्वामिकं नायिकाप्रतियोगिकं दानं लगति। न्यायमार्गेण प्राप्नोतीत्यर्थः। तथा च त
दर्थं निर्बंध आवश्यको ममेति भावः। स्थितिज्ञापनपक्षोत्तरविचारे त्वेवमर्थः। सर्वे मे
वर्णा कुलं स्वात्मस्वात्कृतमपि सर्वासामपि मृगदृशां दानं लगतीति नात्रांतरंगव
हिरंगादिकं विचारणीयं किंतु सर्वोपि सखीसमुदायो ममानुग्रहपात्रमिति नेमायु
हे ऽपेयणीयानवेतासांशंकाभिकर्त्तव्येति भावः। इदमेव ज्ञापयितुं मृगदृशां दानं ल
गतीति सर्वासामेव ज्ञानतृष्टिर्विशिष्टा निरूपिता। मामकमित्येनेनान्यस्वामिकत्वं
निराकृतं। लगतीति लगे संगइति भोवादिकस्य लटि रूपं ॥ ७ ॥ स्वामिन्यस्त्वदानं ल
गतिमामकमित्यत्र लगे भ संयोगविशेषार्थपरत्वांगीकृत्यासंदिग्धेपि वचने भग ७१

अश्माभिर्निषेधं कं वचनेनौ हि गणं वचनेन क्रियया च विरुद्धा न्वरि ... गुणमेव करोषि का त्वं यदि [illegible]

[illegible]

विषयीभूतवस्तुजिज्ञासानिर्बंधं दृष्ट्वा स्पष्टं ज्ञापयितुं भगवान् यदुत्तरितवांस्तत्प्रकारं वदंति
अंचलेनापीति। न खशब्दिदानं तत्रैव रसशास्त्रमर्यादया प्राप्नोतीति तथोक्तमिति भावः
। स्पष्टार्थमिदं ततः प्रणयकोपेन स्वामिनीवचनं यज्जातं तन्निरूपयंति। कथमिति। कथ
मिति कोमलाक्षेपो। भगवांस्तु तत्पक्षमुच्चाटयित्वा कथमित्यस्य प्रश्नार्थकत्वं परिक
ल्प्योत्तरमाह। तदुत्तरमुल्लिखंति। सरोजेत्यादि। सकलसेतवोप्युज्झितां इत्यस्योत्तरमा
ह। सखीत्यादि। तथा च सकलसेतवोप्युजिता इत्यत्र सकलपदं चिंत्यप्रयोजनमि
ति भावः। तदेवमुन्मथोदचरित्रं स्फुटमवलोक्यापि स्वरूपलावण्यवशीकृतांतःक
रणा कोमलपदवाक्यैरेव यदुक्तवत्यस्तद्वचनमाहुः। वचनोक्ताविति। वदंतीत्यभिप्राये
णातदुक्तमंगीकृत्य प्रौढवाचा तद्वचनं निरूपयंति। त्वद्वचनेति। कथं कुलवधूजनमित्या

का: भवत्याएव कथं कामप्रति ... पं ८

[illegible]

दित्वदृश्नेनसहकृतंमत्करणंमत्कार्तिस्तथाभवत्येवेएकस्यद्वितीयसहभावेद्विगुणतायांकः
संदेहइतिभावः।एवमनेकधाभक्तवचनान्यन्यथायोजयित्वातदुत्तरदानेतिचातुर्यं
भगवतिदृष्ट्वैवमेववचनप्रतिवचनधारायांविलंबोभविष्यतीतिभगवच्चातुर्यंसभाज
यित्वाप्रस्तुतंस्मारयंति।वाक्चातुरीति।तर्हिंमद्वचनमंगीकृत्यदानेपिविवादोनकार्य
इतिभगवद्वचनसंभावनायामाहुः।अतिदुर्ललितमिति।प्रामाणिकानादरणीयमि
त्यर्थः॥९॥दधिषुदाननिषेधंसमर्थयितुंप्रसिद्धानिदानसंबंधिवस्तून्युपलक्षण
त्वेननिरूपयंति।किंनालिकेरेति।गोकुलपालकेतिसंबोधनात्नीतिमार्गेणस्या
मव्यमितिभावः।वस्तुतस्तुपालकात्वाघत्करिष्यतितदुचितमेवकरिष्यसीत्याशयः
अतएवकिंनालिकेरेत्यादिनाशृंगारोपयोगिसामग्रीसर्वाप्यस्मन्निकटेस्तीतिमि

षांतरेणस्मारतां॥१०॥तासांगोरसदानेविरुद्धनिर्बंधंविज्ञायभगवान्सावधारणंदान
ग्रहणप्रतिज्ञांकांतदांस्तद्वचनंनिरूपयंति।पूर्वार्द्धेनगोपीधित्यादि।गोरसस्येवेत्येव
कारेणवस्त्वंतरस्यदानंग्रहणंनिराकृतं।तथाचातिस्वल्पपदार्थस्यापिगोरसस्यदा
नांगीकारेणतावान्विवादोनोचितइतिभावः तासांशुद्धभावेनभगवत्प्रसादंज्ञाप
यितुंगोपीपदं।आत्मसात्कृतत्वज्ञापनेनवा।तस्मान्मत्शरणंगोष्ठमितिवाक्यात्मुख्यप
क्षं।गोपदमिंद्रियपरं।एवंकारेणरसांतरव्यवछेदः।भक्तासुगृह्णीमइतिबहुवचनं
सर्वगोपबालकाभिप्रायेणेतिपरिकल्प्यसाक्षात्प्रियोद्देशनाक्षेपोक्तिरसभाविते
तिगोपबालकानुद्दिश्यकिंचित्कोपेनाहुः।भवतःकइति।तथाचभगवत्तायथेष्ट
माचरणीयंनतुगोपबालसमुदायेपीत्याशयः।इममेवभक्तानामाशयंगृहीत्वास्व

स्याप्यभीष्टत्वाच्चगोपालानगमनयनार्थंप्रेरयिष्यति।गतागावइत्यादिना।ततश्च
७५ मर्थंगोपयित्वांतरमुद्घाव्यवक्रोक्त्याप्रवृत्तंभगवद्वचनंनिरूपयंति।विपिन
चरिणइति।भवंतःकेवलंतिष्ठंतीत्यन्वयंस्वीकृत्यभगवतोच्यते।वयंतुविपिनचा
रिणोभवामस्तान्भवंतःकइत्यादिनावारिसंस्थितान्जलेसम्यक्स्थितान्क
थंवदसि।नहिस्थलस्थितोजलस्थितइतिवक्तुंयुक्तमितिभावः।कश्चहोजल
वाचकःप्रसिद्धः।नल्लवांगनइतिशुद्धभावज्ञापनं।एवंभगवदुक्तौक्तिमाज्ञाय
तदेववाक्यमर्थांतरेणयोजयित्वाच्छलशृंखलार्थंस्वामिनीनांवचनंयत्प्रवृत्तं
तदाहुः।इयदवधीतिभगवद्वचनव्यक्तिकल्पनात्वेवं।विपिनचारिणोपिवयं ७४
वारिसंस्थिताश्चभवामइत्येवमलक्षितगतिस्वरूपानस्मान्कथंवदसि।केनप्र

कारेणवदसि।जलस्थितिर्वास्थलस्थितिर्वापुरस्कांयवदस्तीतिअन्यत्रवा।त
थाचास्माकंस्वरूपावस्थितिःकिंप्रकारिकेतिनिश्चित्यवदेत्येवंभगवद्वचनता
त्पर्यंपरिकल्प्यपरिहसंत्यइवोत्तरमाहुः।इयदवधीतिअहहेत्यव्ययेनपरमाश्चर्यं
द्योत्यतेवनस्थितोपिवारिस्थोपिभवसीतीदृशमनियतस्थितिमत्विरुद्धवमेव
द्धात्मस्वरूपंकिंलंलोकोत्तरमेवेत्यहहपरमाश्चर्यमिदमितिपरिहासोक्तिः।अतएवेद
मद्भुतंतवरूपमियदवधिनोज्ञातमितिपरिहासस्सूचनं।वस्तुतस्तुवनस्थितोपिल्ली
मुत्रजलेषुसर्वानाडीकर्तुंतादृशवारिस्थितोपिभवसि।विकल्पद्योतकशब्देनकदा
चिदंतःकरणेकदाचिद्बहिरपिहृदयदेशादावित्यनंतस्थानसूचनं।तादृशंतवरू
पंमन्वंतल्लीलायुतंस्फुटमिदानींपर्यंतनज्ञातमेव।परंत्विदानींविपिनचारिणोवा

रिसंस्थितानित्यादिवचनोपदेशैरधुनैवज्ञातमित्याशयेनाहुः। इयदवधीति। अदे
लीलासृतजलधौ एजमानं तत्स्वरूपमुत्तममियद्वधिमयानोज्ञानं। इदानीं तु
भवता ज्ञापितं ज्ञातमिति भावः। तथा च कथं वदसीति भगवत्प्रश्नस्य विपिनचारि
णो वारिसंस्थिता नित्यादिवचनोक्तिदिशा लीलानुकूलनानास्थितिराजमानं
तवरूपमिदमित्थमेवेति वदामीत्युत्तरं निष्पन्नं। अत एवाहुहे त्याश्चर्येण लभ्य
लाभादिव परमहर्षः सूचितः। एतद्वचनं श्रुत्वा भगवता प्रोक्तवचनं निरूपयंति।
व्याजइति। अत्रैवं संगतिः भवतीभिर्मदीयस्वरूपं स्वचातुर्येण न ज्ञातं। किंतु मये
व ज्ञापितं बुध्यते। अहं तु भवत्स्वरूपं भवतीभिः संगोपितमपि मदीयचातुर्येणैव
मया ज्ञातमित्यभिप्रायज्ञापनार्थमिदं भगवद्वाक्यं परिहासपूर्वकं प्रवर्तते तदा ७५

ईर्व्याजइत्यादि। व्याजं एव कृतोस्ति। न तु गोरसविक्रयार्थं गमनमिति भावः। तर्हि कि
मर्थं गम्यते स्माभिरिति प्रतिवचनं प्राप्य भगवानाह। उरस्थलस्थायि किमप्यनि
र्वचनीयममूल्यं वस्तु नयसि। तद्वस्तु मदन्यपुंसो लक्ष्यं ज्ञानार्हं न भवति। किंतु म
मैव तल्लक्ष्यं ज्ञेयमित्यर्थः। तथा च भवतीभिर्मत्स्वरूपं मया बोधितमपि न ज्ञातं प
रं मया तु भवतीनां स्वरूपं भवतीभिरप्रकाशितमपि ज्ञातमिति तदुपहासार्थं स्वो
त्कर्षस्थापनं व्यंग्यं॥ २५॥ ततः स्वामिन्यस्तादृशं भगवतः परिहासवचः श्रुत्वा
प्रिगोपबालसमक्षं तदुत्तरं वक्तुमयोग्यमिति तत्संगमुच्चाटयित्वा प्रस्तुतमे
व पथोदानप्रसंगं पुरस्कृत्य यदाहुः तदनुवदंति। सततमिति। स्पष्टोर्थः॥ २६॥
नूनं एवायमनुग्रहः इदानीं दृष्ट इति मिश्रांतरे थी। अत एव नो जातु श्रुतमपीत्यु

तै। अत्रैवपयशद्धेनरसवद्वस्तुरुच्यते। तथा चैवमुद्यम्यभगवान्तादृशदानंगृहीत्वा
त्रियन्तदिदंकदापिनश्रुतमपीदानींतुसाक्षाद्दृश्यतइतिमहाननुग्रहइतिभावः। प
रंतुतद्दानप्रकारेवयमनभिज्ञाइतितद्दीतिमस्माकंशिक्षयेत्याशयेनपृच्छंतिकु
तइति। किंप्रकारमवलंब्यदास्यामस्तंप्रकारंवदेतिशेषः। अस्मिन्पक्षेकुतइति
ल्यबलोपेपंचमी। ततोनेकभावगर्भितंभगवद्वचनंयज्जातंतन्निरूपयंति अयइ
ति अयइतिस्नेहातिशयसूचनार्थं। अद्यावधिचौरत्वानदत्तंतवत्वत्संबंधि
गोरसदानमस्मदीयभागंत्वयैवदत्तमशेषतोगृहिष्यामिततःतस्माद्धेतोर्हेसरो
रुहाक्षिममपुरोममसमीपेक्षणंविश्राममंकुरुतिष्ठेतियावत्त्वयेतिदत्तमितिपदे
नसंबध्यते। त्वयासहैवगोरसदानंग्रहीष्यामीत्येवंपक्षांतरेर्थः॥५॥एवंपरस्प ७८

रवचनेपिस्वामिनीनांस्वसमीपस्थगोपबालकेभ्यःसंकोचंदृष्ट्वाभगवान्स्वसमीप
स्थबालानन्यत्रप्रेरयितुंविचारयतितावत्तदाकारणार्थंश्रीगोवर्द्धनगिरिस्थित
गोपबालानांवाक्यंश्रुत्वाभगवान्स्वसमीपवर्त्तिगोपबालान्गोरक्षणार्थंमाज्ञा
पयत्। तदेतन्निरूपयंति। गतागावइति। गावश्चरंत्योदूरंगता। अतएवप्रखराणि
स्फुटंदर्शनयोग्यानिखुरचिह्नान्यपिवनेनदृश्यंते। तथाचखुरचिह्नमार्गेणशी
घ्रंसत्वापरावर्त्तनमशक्यमितिभावः अतएतदर्थंततोभगवत्सकाशाद्यूयंसर्वेपि
इहास्मन्निकटेद्रुततरमतिशीघ्रमागच्छत। एवंचसर्वैःसंभूयसर्वतोगावःपरावर्त्तनी
याइत्याशयः। इत्येवंप्रियाणांप्रेम्णास्वव्यपर्यंतंप्राप्तानांगोवर्द्धनशिरःस्थितगोपा
नांवचनंस्वनिकटवर्त्तिगोपानुद्दिश्यसमाविर्भूतंश्रीगोविंदःसमाकर्ण्यसभयंस

मीपस्थान्गोपान्गोरक्षणाविधावाज्ञापयादिति।उशतीतिसंबोधनेनभगवतश्चातु
र्यातिशयंसूचयति।स्वामिन्यभिलषितसिध्यास्वस्यानंदभरंचज्ञापयति।सभयम
तिक्रियाविशेषणेनभगवदाज्ञापनानंतरंविलंबाभावःसूचितः॥६॥ततोतिह
र्षेणसंभूयसकलभक्तानांवाक्यंयदुदितंतद्वर्णयंत्यःपूर्ववचनापेक्षयाप्रकारभे
दंज्ञापयितुमादौतदुपक्रममाहुर्गतेष्वितिस्फुटोर्थः॥७॥एवंवचनोक्तिंप्रतिहा
यश्रयेयद्ध्यावधिश्चोररित्येतिभगवद्वाक्योत्तरदानार्थंस्वसखीमुदिष्यप्रवृत्तं
स्वामिनीनांवाक्यमाहुः।विपरीतमिति।हेव्रजगोपनितंबिनि।व्रजस्थितोत्कृ
ष्टगोपस्यनितंबिनिरत्यानंदजनके।एतेनपरोक्षवादमाश्रित्यभगवत्त्रियात्वमु
क्तं।अतएवभगवद्वाक्यतात्पर्याभिज्ञतयातदुद्देशेनस्वामिनीनांवचनंप्रवर्तते इ

दमिवस्वह्यदमग्रेस्फुटकरिष्यंति।अन्यामपिनिजसदृशींकर्तुंवांछत्ययेकिंतुइ
त्यंतेनवाक्येन।अहोइत्याश्चर्येमाहानविपरीतंवदतीत्युपहासः।भगवद्विमर्शे
वयमेवनिर्धारेणक्रिलेतिप्रसिद्धेचोरजनाभवामःएषपरिदृश्यमानउद्दैलचरि
तोनंदराजसुतःपरमयंसाधुजनोभवति।इत्येतद्विपरीतं।एवंसाध्वसाधुविवे
चनंविपरीतमित्यर्थःसाधुजनेसाधुत्वस्यअसाधोसाधुत्वस्यव्यवस्थापनात्त
थेतिभावःतद्वैपरीत्यंस्फुटंज्ञापयितुंभगवतःउन्मर्यादचरितंवक्तुंविशेषणमा
हुः।विजनेविपनेप्रमदाहृधन्निति।वरसाधुजनइत्यत्रवैपरीत्यसंबोधेनलक्ष
णयासाधुविपरीतत्वमुच्यतेउपक्रांतंबहुतत्रकिमुच्यतइत्यादिवत्।इदंवाह्यंव्या
ख्यानं।आंतरपक्षेतुयथोक्तमेवव्याख्यानंभगवदीयंवस्त्विदानींपर्यंतसंगो

ष्य भगवतेन प्रकाशितमितिवयमेव चौर्यंर्भाः। न गवांस्तु साधुरेवायं तोस्मिदी
ये चौर्यं मन्यन्त प्रसिद्धं माभूदिति विजने स्ववने स्वकीये गृहितुं अस्मान प्रार्थय
तेइत्यादि समुत्थं। एवं सहास वचनं श्रुत्वा भगवता युद्धत्तरितं तद्वाक्यमाहुः। विप
रीतमिति। भवतीभिर्मयि यद्विपरीतत्वं स्थापितं। एवोक्तवचने। तन्त्रयुक्तं यतोर
साधिक्येनापि कायाः पुरुषायितात्वमिति वात्स्यायनसिद्धांतात्स्वधर्मविपरी
तधर्मांगीकारो भवतीनां धर्मो। न तु ममेति। हीत्यनेन रससिद्धांतस्मारणायुक्तत्वम
र्थस्य ज्ञापितं। मरौ श्चवत्मुग्धे अक्षणीयासामितिदृष्ट्यातापहारकत्वमुक्तं। त
थाच स्वनीष्ट विपरीतत्वमननुसंधाय मपि स्वधर्ममारपयत्योनातित्युत्पन्नाय
यमितिपरिहासः। अनेन अयेयद्यावधिचौर्यं रीत्येतिस्ववचनं समर्थितं। इदं ७८

भगवतो चातुर्यवचनं श्रुत्वा तद्वचनांगिकारेणैव भगवंतं प्रतिवुध्यवक्रोक्तिचातुर्येण
यद्वचनमुक्तं तदाहुः नहीति। यदि तावदस्मासु विद्यमानधर्मविपरीतधर्ममुररीकरो
षितदा त्वत्तः सकाशादस्माकं दानग्रहणं युक्तमित्यर्थः। वर्तेतिहर्ये। इदानीं भवान्
दानपात्रं। वयं तु दानकर्त्र्यस्तद्विपरित्येतु वयं दानपात्रं। भवान्दानकर्त्वेति तथेति भा
वः। एवं स्वामिनीनां वचनछलमाकर्ण्य स्वयमपि तदुक्तमंगीकृत्येव वचनपूर्वं यत्कृत
वांस्तद्वचनं कृतिं चाहुः। वहव्य इति। अयमर्थः। त्वत्तो दानग्रहणमस्माकं युक्तमित्युप
दर्शितवचने त्वत्त इत्येकवचनांतात्त्वसिलू। अस्माकमिति बहुवचननिर्देशः। त
थाचैकस्मादेव भवतः सकाशात्सर्वासामस्माकं दानग्रहणं युक्तमेव। न हि वहु
भ्य एकस्य बलं वलतिं तस्माद्वयं वह्व्यो भवानेक इति वयमेव भवत्तो दानं गृहीष्याम

इत्येवयुक्तमिति तं द्वाक्यद्वोदिमं गीकृत्य भगवानाह। वह्व्यो भवत्योहमिहैकएवेति
इत्येवयुक्तमिति तं द्वाक्यद्वोदिमं गीकृत्य भगवानाह। बल्वात्कारेण किंचिदपिक
र्तुमशक्यमित्याशयः। एवं च यच्छक्यं मम तदेव कर्तव्यमिति भवतीभ्य एव दानं मया
देयमित्याशयेनाह। तेनेति। निजानुरूपं दानं बलात्कारिषु प्रबलेषु दानग्रहणार्थ
मुपस्थितेषु देयमेव। कथमन्यथा निस्तार इति भावः। तदेतद्वचनं भगवता प्रस्फुट
मेवोक्तमित्याशयेनाह। इत्युच्चैर्वदन्निति। इत्युपदर्शितप्रकारेणोच्चैर्निर्भयमसं
दिग्धमेव वदन्निंदुमुखीश्चुचुंब। चुंबिवक्त्रसंयोगे। तावता निजानुरूपं दानवितरणं संप
न्नमिति भावः। इदमत्राकूतं। अत्र तावन्निजानुरूपदानवितरणं प्रतिज्ञातं भगव
ता। निजानुरूपत्वं च विचार्यमाणे न किंचिद्विक्रेयद्रव्यं गृहीत्वा भगवान् गच्छति।

येन तदनुरूपं दानं वक्तव्यमत्र। किंत्वतुल्यातिशयाद्वितीयरसात्मकरूपलावण्यामृ
तसंभारसंभृत एव भगवान् सदा राजते। रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति
श्रुतेः। इयं च यद्यपि स्वरूपलावण्यामृतसंभृतिर्विक्रयाहा न भवति। तथापि भ
गवाननुग्रहेणायं भक्तः स्वरूपलावण्यामृतं पाययति तेन तर्पणं कृत्वा तन्मनः स्व
यं गृह्णातीति वस्तुविनिमयात्सेव रीतिः। अत एव दृष्टो वः। कच्चिदश्वत्थ प्लक्ष न्य
ग्रोध नो मनः। नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैरिति। तास्ताविचेष्टा जगृह
स्तदात्मिका इति फलप्रकरणे स्पष्टमेव भक्तेषु लीलाविशिष्टस्वरूपानंदस्थापनं
तन्मनसः स्वाधीनीकरणं चोक्तं। तथा च सति प्रकृते तादृशरसात्मकस्वरूपलाव
ण्यामृतसंबंधि दानं भगवता देयमुत्कृष्टमेव भवितुमर्हति। उत्कृष्टत्वं प्रकृते शृंगार

...स्वरूपप्रकरणतादृशरसस्वरूपतायाः पोषकत्वेनैव वक्तव्यं। ...व्याहि ...
दिति भावकत्वं भगवत्कर्तृकं चुंबनादिचिह्नादर्शनेन भगवतः शृंगाररसात्मकत्व
स्य भक्तैरनुभवितुं योग्यत्वात्। चुंबनयदोत्तरं सामानाधिकरण्येन संबंधांतरेण
वादानं पूर्वस्यारंसशास्त्रादौ प्रचुरप्रयोगादपीदमेव योग्यं दानं। अत एव सकच
ग्रहं चुंबनदानमित्यादिगीतगोविंदादिषु प्रयुज्यते। तदेतदुक्तं निजानुरूपमि
त्यादिना। अत्रेंदुमुखीपदप्रयोगस्येदं तात्पर्यं भाति। चंद्रो हि मृगांकत्वाच्चिह्नस
हितः। अयं च नायकामुखचंद्रः स्वभावतो निष्कलंकः कथं चंद्रसादृश्यं प्राप्नुया
दिति पर्यनुयोगनिवृत्त्यर्थं भगवता चुंबनव्यापारेण नायकामुखचंद्रोपि सचिह्नी
कृतः। एवं च सुरूपत्वमिंदुमुखीत्वमिति भावः। एवं भगवत्स्वरूपकृतिर...

...भिज्ञायपरिज्ञानार्थं कोम
तः करणारसपरवशतया किंचिदपि प्रतिवक्तुमशक्ता अभिज्ञायपरिज्ञानार्थं ... करणमयोग्यमिति विज्ञाप
लट् अनैरनुनयं कुर्वत्य इव प्रस्तुताचरितस्य कुलस्त्रीषु करणमयोग्यमिति विज्ञाप
यंति स्म तद्वचनमाहुः। कथमेवमित्यादि। पूर्वोक्तेन तथाचनीतिविचारेणैवं करण
योग्यमित्याशयः। भगवांस्तु कथमित्येतद्वाक्यस्यापदर्शितदानक्रियायामेव प्र
कारविशेषस्य प्रश्नपरत्वमुद्भाव्य तदुत्तरवचनपूर्वकं यत्कृतवांस्तदुपदर्शयंति। इत्य
मित्यमिति। प्रादात्स्वमुखं इति च। अनेन प्रकारेणेतीत्थं। अनुपदं क्रियमाणं नखदा
नामेव प्रकारीकृत्य चुंबनं वितरामीत्यर्थः। इति पदोत्तरं वदन्निति शेषः। इति वदन् स्मे
रसुंदरस्मितं यस्य तादृशो भगवान् मुखे। नखप्रादात् उक्तप्रकारेण वदन् स्मितपूर्वं
कं सुखदानं नायकावदनैकदेशे कृतवानित्यर्थः। इत्थमित्थमिति। द्विरुक्त्या वय

देवतारूपायास्तव कामनृपदर्पहरणार्थं तज्जय आवश्यक इत्याशयेन सपरिकरका
मस्थितिं निरूपकं भगवद्वाक्यं दर्शयंति। निकुंजनगर इति। तर्हि तस्य सामग्रीक
स्य ससत्वात्सेजेतुमशक्य इति तु न शंकनीयमित्याशयेनाहुः। अपांगेति। ते अपांग
एव शरो माव न्न संचरतिपरमिति। तथा चानायासेन कामजयशालित्वेन शृंगारपरमो
त्कर्षो व्यंग्यः। वस्तुतस्तु तव कटाक्षलेशेन पूर्वमेव जितः कामो दास्यं प्राप्तः स्वनिकृत्य
र्थं तव श्रीणनायैवेदं कृतवानिति तदंगीकरणेन सफलीकुर्वित्याशयनिरूपकं भगव
द्वाक्यमाहुः। रतिप्राणेशोयमिति। तथा च स्थलस्योत्कृष्टतया शृंगारपोषकत्वं व्यंग्य
मित्यामिन्नुकार्थः॥५८॥ इदानीं पिकादिकलशब्दकोलाहलेरसपोषकत्वं ज्ञापयितु
तदाहुः। निकुंजदुर्ग इति। कलकंठाः कोकिलादयस्तत्कूजितमिषेण काम एव

मामाह्वयतीति भावः। तथा चासहायस्य मम सहाय्यार्थं गमनमावश्यकमिति भावः
॥५९॥ तर्हि मया युद्धसाधनं विना स्वरूपमात्रेण कथं सहाय्यं कर्त्तव्यमिति संभाव
नायां यद्वक्तव्यं तन्निरूपयंति। त्वदाननेति। तथा च त्वत्सार्थं गमनमात्रेण तत्पराक्र
मो दूरापास्तो यतो लज्जित एव तिष्ठतीति तथा च त्वयात्यंतं पराजितः क्वापि सन्मान
नं न लभत इति स्वरूपसत्तार्थं प्रत्युत त्वदधीनः सन् त्वत्कृतसन्मानमेक्षत इति
न काचिच्छंका प्रत्युत तस्यानुग्रहः कर्त्तव्य इति भावः। किंच। निगृहीतोपिनोपेक्ष
णीयः। किंतु स्वाधीनकृत्यस्यापनीयो तो वश्यं तत्र गतिं समर्थयितुं यद्वाक्यं तन्नि
रूपयंति। त्वदीयेति। स्मरस्त्वदीयनेत्रकटाक्षबाणजितो तत एव विद्रुतः सन् स्वशरैः
स्मरोद्बोधकानेकवर्णसुगंधिपुष्पलतादिभिः संवृते कुंजदुर्गे वसति हे नितंबिनि

सुमध्यमे क्षणान्तं कामं निजविहारबंधेऽपि नियंत्रितं कुरु स्वाधीनं त्वं कुरु ॥ ८३ ॥
स्वामिनीनां कंदर्प्पं ज्यादिकमनाथासेनैवेति ज्ञापयितुं स्वरूपसौंदर्यं भगवान्
वर्णयामास। तत्रादावुरोजसौंदर्यनिरूपकं तद्वाक्यं दर्शयंति। अहमद्येति स्पष्टं। ध्व
श्रीमुखवर्णनवाक्यं निरूपयंति। चंद्रावलीति। अयं भावः प्रथमतः पूर्णचंद्रविंब
वन्मुखेंदुभानं। ततस्तत्सौंदर्ये विमर्शे तन्निरवधित्वभानात्सिंधुत्वोक्तिः। तत्रापि सू
क्ष्मकुंतलादिघर्म्मल्ललाटभ्रूनेत्रसूक्ष्मसालंकारनासापुटगंडस्थलालकश्री
कर्णताटंकादिकृतं प्रतिक्षणविलक्षणशोभानां प्रत्येकं निरवधित्वभानादसं
ख्यातसिंधुत्वोक्तिरिति। तदेतदुक्तं कतिसंति सिंधवइति। एतेन चंद्रावलीत्वमन्व
र्थमेव समर्थितम्। धूमाने क्षेत्र तदुद्भूत चंद्राणामप्यानंतस्यव्याप्यत्वादिति भावः

इतः परं तद्वियोगधर्मीणां सौंदर्यं निरूपयन्नादौ नेत्रसौंदर्यं वर्णितवान्। तामंबुजरू
पेण लोचनवर्णनोक्तिं निरूपयंति। त्वल्लोचनेति। हे कृशांगी दं त्वल्लोचनांबुजं सौंद
र्यसीधु सौंदर्यमकरंदामृतं परितः किरति स्यंदते। तत्रस्मादेवमकरंदामृतेन मेलो
चनभृंगयोः पारणं भवति। अनशनादिव्रतस्थस्य तत्संपत्तिकृदाहारः पारणोच्यते
। तेन मे तल्लोचनांबुजमकरंदपानतः पूर्वं स्वनेत्रयोर्निरशनव्रतं सूचितं। तेनैव च तत्
द्भूतपूर्त्ति सुचनेन दर्शनस्यावश्यकता च ध्वन्यते। अत एव क्षणमपित्वन्नेत्राब्जवि
योगमसहिष्णुर्मल्लक्षणो भ्रमरस्त्वन्नेत्रतारकासारूप्यं प्राप्तस्तत्रैव तिष्ठतीत्याश
येन नेत्राब्जविशेषणं निरूपयंति। निजेति। निजगर्भे नेत्रमध्ये खेलं लीलाविलासं
कुर्वन्तयी नेत्रतारकारूपत्वन्मदभ्रमरस्ततः कृत्वा तरलमति। चंचलमित्यर्थः।

कदाचिदतिचपलमधुकराक्रांतकमलं नत्वापरेण घूर्णीयमानमेवावतिष्ठते तथेदं भातीति तात्पर्यं॥ ६५॥ नेत्रसौंदर्यं दृष्ट्वा मुखशोभायाऽर्वचनवचनीयत्वमेव प्रतिभातं भगवता निरूपितं तद्वाक्यमाहुः। मदीयेति। अयमाशयः। नायकामुखेक्षणमतिविलक्षणशोभादर्शनजनितानंदानुभवात् किमिदं चित्रं कथं चैतन्मुखश्रीनिरूपणीयेति विचारे किमप्यन्योपमानादिभावं प्राप्तुं नोत्सहत इत्याशयेनोपलक्षणविधया प्रसिद्धपदार्थद्वयतादूप्यं संभाव्य निषेधति। पूर्वोद्दैनतावतानुभवितुमेवोपपद्यते न तु वर्णयितुमर्ह इत्याशयेनोक्तं। विषयो न वाचामिति॥ ६६॥ पुनः सविशेषणमुखांबुजशोभां भगवता प्रकारांतरेणोत्प्रेक्षितां ग्राहयंति। यदतिशयितेति। अनंगस्य यस्मान्मयि अतिशयितो रागः स्नेहस्तिष्ठति। तस्मादेव हेतोर्निजस्य रसमयं यच्चाप ११

शरावधिचापशरादिकमभिव्याप्याशेषं स्वकीयमत्यंतरंगतया गुप्तं सर्वस्वमदर्थे प्रकटं चकार। तत्किमत्यपेक्षायामाह। तदिदमिति। यत्प्रकटं चकार तदेव मनोज्ञत्वन्मुखांबुजं विभातीति। तथा च भ्रूपक्ष्मनेत्रादिसामग्रीयुतं मुखारविंदमिदं न भवति किंतु कंदर्पस्य सर्वस्वमेवेदं सुगुप्तं मुखारविंदरूपेण प्रकटमिति भावः। तत्र भ्रूश्चापः पक्ष्माणि ज्या नेत्रकटाक्षाः बाणा इत्यादि ऊह्यं तिलकशोभां वर्णयितुं भगवद्वाक्यमाहुः। मन्मानसमिति। तव तिलकं मणिमयं कुंकुमादिना रचितं वा मन्मानसं वशीकुर्वन् भ्रूचापे समारोपितः कंदर्पस्य कांड इव भातीत्यन्वयः। चंड उग्रप्रतापः। अत एव मन्मनसो वशीकरणं। प्रत्यंचां मनव लंब्यैव धुनः प्रांतसंबंधमात्रेण स्वकार्यकरणादद्भुतः। इदमप्येकं कंदर्पस्य सर्वस्वं निरूपितं। इदानीं क्षणक्षणं मुखशोभायाः सौंदर्येण वैलक्ष

एवमनुभूयस्वदृशोर्भगवांस्तत्स्वरूपानुभवयोग्यस्वरूपलाभाभिलाषबोधकं वचनमा
हा।नह्यदंति।चंद्रत्वेतुचकोरतेति।हेतामरसेक्षणे।तेवदनस्यसांप्रतंचंद्रत्वांबुजत्व
स्नेहांबुत्वसौरभ्यामृतत्वान्यतमत्वंनिर्द्धारितंनभवति।अतोनियतैकरूपेणतदनु
भवोनसंभवतीतितदनुभवयोग्यंरूपभेदंप्रार्थयंति।चंद्रत्वेतुचकोरतेत्यादि।तथा
चयदातवमुखस्यचंद्रत्वचंद्रधर्मप्रादुर्भावस्तदैवतयोर्ममदृशोस्तदेकोपजीविचको
रताऽस्तु।पंकेरुहत्वेतुमधुपतास्तु।निरुपधिस्नेहांबुतायांसत्यांदृशोर्मीनत्वमस्तु।अत्र
स्नेहपदेनभक्तिरुच्यते।श्रीमुखस्यफलात्मकभक्तिरूपत्वात्तथात्वंजलस्यरसनी
यापेयत्वधर्मसाम्याच्चस्नेहेंबुत्वोक्तिः।सौंदर्यमेवामृतंतद्रूपतायदामुखेप्रादुर्भवति
तदाममदृशोर्दिव्यास्वनिमिषतास्तु।पक्ष्मोन्मीलनाभावधर्मप्रधानंदेवत्वमस्ति

तिभावः।देवत्वमृतेसुधापानंनसंभवतीतितथा।लावण्यामृतस्यापाद्दतनेत्रद्वारेव
मेयत्वादनिमिषत्वधर्मप्राधान्येनैवदेवत्वाभिलाषोनसुधर्मांतरेणापीतिभावः
॥८८॥वेणीवर्णयंति।शीकरेति।अनंगगजवारणोहस्तीतस्यशीकाराजलबींदव
स्तत्सहितःशुंडादंडइवेयंवेणीभाति।शुंडादंडोवेण्युपमानं।शीकरैरूपमेयंवेणी
प्रदेशंदर्शयितुंविशेषणमाहुः।मुक्ताश्रेणीगुच्छातिशुभ्राग्रेति॥८०॥एवंशृंगार
रससमुद्बोधकवचनामृतश्रवणजस्मरवेगजनितमस्वास्थ्यंस्वामिनीप्रगत्यकिं
चिद्वचनमुक्तंभगवतातद्दर्शयंति।लोकोत्तरेति।हेअंभोरुहाक्षि।तवहृदयकोम
लता।लोकोत्तराभाति।लोकोत्तरत्वंप्रकटयंति।नवेति।यतोनवपुष्पमयोपिबाण
स्तवहृदयांतर्गतः।संस्कृदति।तवव्यथांजनयति।तल्लोकोत्तरत्वंतस्याः।नहिपुष्प

१०१

स्पर्शेन कस्यचिद्धृदयेबाणवद्व्यथा क चिद्दृष्टचरी तस्मान्नथेत्यर्थः॥ नवत्वं कलिका
रूपत्वं प्रथमदर्शनमेवेङ्गानीमिति कामस्याः परिपुष्टत्वान्नथोक्तिः॥ ननु किमेताव
ताज्ञापनेन प्रयोजनमित्यत आहुः॥ शमनायेति। तस्य बाणस्य बाणजनितपीड
याः इत्यावत्। शमनाय दूरीकरणार्थं ममृताभंमामन्त्रकुरु हृदये धारयननुभव
ताके संततपीडा निवर्त्तनीयेत्यत आहुः अगदराजमिवेति सिद्धपारदादिरसायन
तुल्यमित्यर्थः तथा चेदमेव प्रयोजनं ज्ञापनस्येति भावः॥ ७१॥ एवमनिष्टनिवृत्तिमु
क्त्वा तेनैवौषधेनेष्टसंप्राप्तिमपि दर्शयितुं भगवद्वचनमाहुः। करेति। त्वदीयकर
चरणयोर्नखराणां नखान्येव चंद्रास्तेषां श्रेणीशमयेसमयविशेषे मया काशनील
शरीरेण धृता संबद्धा त्वं लब्धा प्राप्य हे चंद्रावलि स्वकीयं नाम अन्वर्थं चंद्राणा १२५

मावलयोयत्रैवंयोगिका र्था नुगुणमध कुरुष्वेति॥ ७२॥ एवं स्वरूपेणान्वर्थतायां
स्वोपयोगमुक्त्वा शिशिरत्वादिधर्मैरपि तेनाम्नोऽन्वर्थतासिध्यर्थं स्वोपयोगं दर्शित
वान् भगवास्तद्वाक्यमाहुः भाषितेति। भाषितं भाषणं। हसितं हास्यं। विलोकि
तं दर्शनं विकसितं प्राप्तविकासं यद्वदनं। अंगानि च तेषां प्रत्येकं संगश्च तत एव चं
द्राख्ये त्वं मां शिशिरय चंद्रसमूहे रिव शीतलं कुरु। तज्ज्ञोकोत्तरचंद्रसमूहैः शी
तलतासंपादनेन हे चंद्रावलि स्वीयं नामान्वर्थं सार्थं कुरु। अत्र चंद्रसमूहानां ता
पनिवर्त्तनहेतुत्वोक्त्या तापबाहुल्यं व्यज्यते तेन तापस्य तदेकनिवर्त्तनीयता त्व
मेनोपेक्षा न रक्षणीयेति ज्ञापितं॥ ७३॥ अस्मिन्नर्थे स्वामिनी हृदयस्यापि संवादं
दर्शयितुं भगवद्वचनं यदुदितं तदाहुः। ग्रंथमइति। महद्भिरुपायनं मंगलवाद्य

१०२

रः सरमेवानेयमितिं दर्शयितुमाहुः। अनिमनोहरेति। गम्यमानसदार्थे तृतीयेयं ॥७४॥ एवं सपरिकरं सअर्थासमवाधानेसतितदुपायोगोपिद्रागेव संपादनीयो विलंबेमानेभावादित्याशयेनयदुक्तंतद्वाक्यमनुवदंति। विलंबितमिति। विधि लंबमित्यर्थः। भावार्थक्तनिष्ठांतमिदं॥७५॥ उपायनानयननिदर्शनेनस्वामिनी ष्वर्थे संवादोभगवतास्वाभिप्रायविषयेर्थे प्रदर्शितस्तमेवेदानींभगवद्वचनोत्त रंप्रोद्भूतभावविषयदचेष्टाभिः स्पष्टमेवजातमितिज्ञापयितुमाहुः। वदनेतिमिथस्त त्तद्दृष्ट्वालोकनेनचसर्वासामन्योन्यसंवादयंतिज्ञानार्थे॥७६॥ ततोमुखप्रसादेनस र्वा अन्योन्यंसंवादमुपलब्धसौसक्येनभगवतियथातासांप्रवृत्तिर्जातातामनु वर्णयंति। ततइत्यव्ययं। मुखप्रसादेनानुमितस्यपरस्परसंवादस्यानंतरयेमाहहे

१०२

तेषांगिततस्तास्तेभगवतश्चतुरस्यकीमत्यः परिवेष्टयामासुः। ननुकथमेवंसंभवति यावतास्वाभाविकधर्मीणअपारीनांतांसुजुम्भूकाणामेवविवक्षितकृतिप्रतिबं धकत्वस्यास्थितिरितिशंकायामाहुः। सहजेतिसहजउत्पत्तिशिष्टोनिर्भरोयःप्रण यपूरस्तेनसंप्लाविताभिनिमज्जितानित्वयाधृतिभयानियासामितितास्तथा। ए वंनिर्भयंभगवत्परितःस्थित्यनंतरंयज्जातंतद्वर्णयंति। स्वपाणीत्यादि। अत्रस्वप दंनैस्वधारणमक्तं। तेनभगवदेकस्पर्शयोग्यत्वंध्वनितं। एवन्तदंगेषुस्पर्शात्यएव स्पर्शसमकालेपरमानंदवारिधौनिपतिताइवबभूवुः। यथाकश्चनचिरंधनाभिला षीरत्नाधाकरेअकस्मात्प्रोरत्नादिसमूहमप्रतिबंधेनग्रहीतुकामोयइच्छयातस्मि न्नित्वमेवाप्रत्यूहंप्राप्तस्तदानंदोद्रेकेणकिंचिदपिनवेदतथैताजाताइत्यर्थः। ननु

न्नादृशामं रसाप्तिसाधनमासां किं स्थितमित्याकांक्षायामाहुः॥ प्रियाइति। यमेवे
षवृणुते तेन मा स्यां किं स्थितमित्याकांक्षायामाहुः। लभ्य इति श्रुतेर्वरणैकसाधन
वत्य इत्यर्थः॥ ७७॥ तं भगवदंगस्पर्शजमुखं तासां निरूप्य भगवतो पितदंगस्पर्शो
त्थसुखानंदभरेण चिरं संभाव्यवस्थामिव निरूपयंति प्रिये ति। हरा धासहृच्चरितप्रि
येषिणा स्पर्शोदिव पुलकपालिः प्रियो भगवान् व्रजवरवधूनां विकसितं चतदेव
स्मितेन मंदहासेन स्मेरं मनोहरं यद्वक्त्रं तत्समुदितस्वभावोद्गारिण्या सम्यग्विभा
वादिसामग्र्यां उदयं प्राप्तेन स्वनिष्ठो भावः शृंगाररसात्मकः स्थायीभावस्तदुद्गा
रिण्या सत्वचारणशीलरसेन वा केवलं रसवृत्तितया परितो रसैकव्याप्तया इति
प्रदर्शा इति स्वेदस्वेदलसारस्तंभादिकसात्विकभाव विभावादर्धमुद्रां प्राप्तोताद

शेषा दृशा पश्यन् चिरं कियंतं कालं तस्थौ मभजदिति तत्स्वरूपमात्रध्यान परो बहिरनु
संधानरहितो जात इत्यर्थः॥ ७८॥ ततोऽनु तादृशशोभापुरःसरं निकुंजदेशं प्रतिस
मागमनं वर्णयंति। गोपीति। गोपीनां कपोलमेव मुकुरं दर्पणं। जातावेकवचनं। त
त्र प्रतिबिंबितानि यानि स्वानि स्वकीयान्यनंतानि रूपाणि। तेषामवलोकनं यत्र
। तादृशीयानि कुंजगति निकुंजं प्रति गमनं तया स्मृता रासलीला येनेति तथा। त
त्र हि कृत्वा तावत्मात्मानं यावती गोपयोषित इति वचनात् प्रति गोपी भगवद्रूपा
णां प्राकट्यमुक्तमिति तथेत्यर्थः। आनंदसिंधो भगवतो लर्हयं स्तरंगास्तद्वत्
काशमानाभिः प्रियाभिर्युक्त प्रियः स्वनिकुंजदेशमचलदिति। यथात्यद्भुतसुधा
ब्धिः स्वकीयतरंगविलासैरतिशयं शोभते। एवं स्वयोग्यसखीवृंदैस्तरंगैरिवग

तिमद्धिरण्यमशोभत।तदुक्तं।व्यरोचताधिकंतात पुरुषः।शक्तिभिर्यथेति।स्वपदेन
कुंजस्यासाधारणत्वमुक्तं।तेनान्येषांद्रष्टुंप्रवेष्टुंवातन्नशक्यमित्युक्तं।तेननिर्भयं
क्रीडासुचितं॥१९॥प्रियाभिःसहितस्यविलासपूर्वकांगतिंभगवतोनिरूपयंति।वि
मोक्षुरेशइति।प्रियायाअंसदेशेनिहितःप्रकोष्ठभागोयेनेतितथाकरपल्लवाभ्यांविचि
त्रलीलाःकुर्वन्भगवान्प्रमदोत्तमासुस्मरस्यकमप्यनिर्वचनीयंप्रगल्भभावंप्रौढं
धर्मंचकार।आविर्भावितवानिति।अतएवस्वामिनीनांभगवतानिःशंकलीलासंपत्त्य
तइविभावः॥८०॥तदानींकुंजंगच्छतोयेश्वरणसंचालनशोभातिशयोजनितंव
र्णयंति।तदानीमितिगमनेसमयेयाशोभासमुज्जनितामहंनिगदितुंप्रस्फुटंवक्तुं
नशक्तास्मि।तत्रापिसौंदर्यनिदर्शनं किंचिदहंवच्मितदेकमाधारणमेवचनंप्र

पेतद्वचनंश्लोकत्रमाहुः।यदुत्थादिति।सद्यियतचरणकमलेकर्मभूतेपूर्वभू
मिप्रदेशादुत्थाप्योत्थाप्योत्तरभूमिप्रदेशस्यापयतिनतत्तेनत्रिलोकीस्त्रीमानंहेश
शिवर्त्नीसःभगवान्समाक्रम्यतिसर्वमेवयुवतीसमूहंस्वसौंदर्येणचरणाक्रांतंकरो
तीत्यर्थः।तथाचपदेपदेविलक्षणशोभातिशयोव्यंग्यः॥८१॥ततस्तत्रोपवेशनंवि
लासंवर्णयंति।लतेति।लतागेहांतरंगनिकुंजदेशस्तदग्रेयदंगणंसुविस्तरतराति
तसुभगाभूमिस्थलीतत्रताभिःसहोपविवेशोपविष्टः।तदंगणस्यपरितोनानातरु
पल्लवानांनानाविचित्रप्रकाशमानसुभगातिस्थूलकुड्यस्येवयथासंनिवेशंस्थितानां
शोभांवर्णयितुंविशेषणमाहुः।अनेकतरुपल्लवपालितइति।एतेनान्येषांतत्रप्र
वेशोवारितइत्युक्तं।ननुकथंनिरास्तरणेभगवानुपविष्टइत्याकांक्षायांयोग्यमासनंनि

रूपयंति। स्वोत्तरियेति। व्रजभक्तोत्तरीयपट्टैः कृतमासनं यत्र। तदुक्तं। स्वैरुत्तरीयैः
कुचकुंकुमांकितैरचीकॢपन्नासनमात्मबंधवइति। ८२। ततोतिप्रमोदभरेणायक्तौ
तदानुग्रहणार्थं भगवतो प्रोक्ताभिः स्वामिनीभिः स्वोचितं दत्तमिति निरूपयंति। स्मि
तेत्यस्येति। स्मितेन मंदहासेन स्मेरो मनोहरश्चास्यंदुर्यस्येति। तथा तरलितं चंच
लीकृतं भ्रूयुगलं यस्य स व्रजेपतिर्भगवान् भक्तानां च प्रियोः तएव रतिरसस्य वि
कासायेन नाश्रं शं परिहासं कुर्वन् स्वामिनीः प्रतिप्रोवाच। भगवद्वचनमाहुः। स्वोचि
तमखिलदानं देहं तं मइति। ततो वचनेन प्रतिभायस्वोचितं दानं भगवते स्वामिनीभि
र्देत्तं प्रकटमेव ग्राहयंति। गृहाणेत्यादि। खमिदं ग्रानं गृहाण त्युच्चैर्वदंती व्रजवधूर्हेश
शिमुखि प्रियं चुंचु वेत्येतदेव दानं रंतरणमिति भावः। ८३। तदानीतन भगवत्स्व
रूपलावण्यरसेनेन कमपि भावं भक्तानुत्यन्नं भगवान् समनुभूयानिर्वचनीयमेव किम
पि रसप्रवशः सन् रूपलावण्यं दर्शितवानु तद्रू[?]यंति। उदारेति। उदारो देयदानवि
तरणेशालीयां देतपंक्तिः प्रकाशः स्नेहकलाजिजानीति स्नेह प्रचार एव तत्प्रकाशस्ते
न सदीप्तः स्फामभादीयासा। तादृशास्ताय शेदासुतमानसे धैर्यं नो चक्रुः। उदीतक
मलाभाव आश प्रत्यंगे भगवति धैर्याभावमेव चक्रुरित्यर्थः। स्थिरमिति धैर्यविशेषणं
स्वमेवस्थिरत्वापादकं विवेकादिहेतुभूतमिति यावत्। प्रत्यंगे धैर्याभावसाधकत्वंसा
मान्यतउक्तमपदृशोविशेषस्तज्जनकत्वमाहुः। स्वदृशापीति। स्वदृशापि स्थैर्यं नो च
क्रुरित्यन्वयः। प्रत्यंग भूषणो पिभवो नेत्राद्वारैव स्पष्टमभिव्यंजनीय इति तथेति भावः।
ततो भगवतः सर्वमनोरथासारेण। — जहीर्षयां तरंगकुंजे गतिनिरूपयंति। करेधृत्वेति

रेण स्वामिनीषु भगवन्कृतमलंकरणं निरूप्य स्वामिनीभिः स्वमनोनुसारेण भगवत्
तिकृतमलंकरणं निरूपयंत्यः प्रथममुष्णीषधारणं निरूपयंति। विविधेति। तनूरुही
षस्स्कमो स्त्रीषु स्त्रीष्वेषः। प्रेष्ठे। मुदिता सती अकरोत्। यथा स्थानमुत्तमप्रकारचातुर्येण स्था
पितवती उष्णीषस्य स्थितिविशेषं ग्राहयितुमाहुः। अधिदक्षिणभ्रु किंचिन्नतमिति
। दक्षिणे स्यां भ्रुवीत्यधिदक्षिणभ्रु विभक्त्यर्थेऽव्ययीभावः। सामीप्यसप्तम्यर्थः। दक्षि
णभ्रुसमीपे किंचिन्नतमित्यर्थः। तत्रैव प्रसूनांचितमेचकचिकुरैः कृतां शोभांनि
रूपयितुं विशेषणांतरमाहुः। विविधेति। नानाप्रसूनैः संकुला व्याप्ता ये संकु
चितकेशाः चूर्णकुंतलास्तै रचितं शुंजितं शोभातिशययुक्तमिति॥ ९६॥ तिलक
रचनां स्वामिन्योभिलषितां वर्णयंति। मृगमदेति स्पष्टं॥ ९७॥ ततोनेकसुगंधिद्र १०८
व्यैर्निर्मितं चंदनांगरागं भगवदंगे नानाविधरचनां कपोलमारभ्य चरणारविंदपर्यंतं कृतां निरू
पयंति। कर्पूरेति। कर्पूरकुंकुममकुरंगमदादियुक्तैश्चंदनैस्तदीयं भगवदीयं सुंदरक
पोलतलमारभ्य पादांबुजावधि सा उरुधानेकप्रकारचित्ररचनाभिरलिंपत् लेपनं
कृतवती। आदिपदादगरुसारेति सुगंधिस्थलकमलादिप्रसूनाधिवासिततर
तैलं तत्सुगंधिजलादि द्रव्यमत्युत्तमसुगंधयुक्तं परिगृह्यते। चंदनैरिति बहुवचने
न शुद्धं चंदनमगरुचंदनं मलयचंदनं च गृह्यते। कलानिधिं चारुवक्त्रं पश्यंतीति वि
शेषणाद्दलभ्यलाभं परमादरेण सानंदानुभवं तल्लेपनं सूच्यते। अत एव चि
रकालिकं नानामनोरथाधिकरणत्वं स्मारयितुं सेति। तच्छब्देनैव स्वामिनी विदे
शः॥ ९८॥ भगवत्सीतां वरं स्थाने स्वामिन्युत्तरीयवसनयोजनं निरूपयंति। कुचयु

त्रं मेतस्य प्रयोजनं द्रष्टव्यं। चि
कुमेति सैरुत्तरीये: कुचकुंकुमांकितैरित्यत्र सुबोधन्यां मेतस्य प्रयोजनं द्रष्टव्यं। चि
१०९ त्ररंभ्रममिति। स्वाभाविकैश्चित्रैरंजनमनोनुरंजकं चित्रं नानाप्रकारैर्भगवन्मनोनुरं
जनं येनेति वा ॥१९९॥ ईदृशी नीचरणयोश्चित्ररचनामाहुः। ततश्चित्रमिति। नूपुरद्वये
नमुग्धयोः सुंदरयोश्चरणयोश्चंद्रवदनी कुरंगमदकुंकुमैश्चित्रं चकार। नूपुरद्वयो
क्तिश्चरणांबुजालंकारमात्रोपलक्षिका ॥२००॥ हृदयेलंकाराणां परिधापनमाहुः
ह्रदीति। स्वनिष्कैर्भरणहारादिकमपि प्रियस्य हृदि निधाय कुंकुमाद्यैश्चित्रितांस्त
नं स्वकंठे स्थितां तत्कंठे: करोत्समर्पितवती कुंडलमंडितास्येति विशेषणात्स्वता
टंकद्वयं भगवत: श्रीकर्णयो: कंसारातेरीशकुंडले स्वयं धृतवतीति ज्ञायते ॥२०१॥ इ १०९
ममेवार्थस्पष्टं यां हर्षयितुमव्यवहितोत्तरश्लोके कर्णाभरणरचनामवप्रदर्शयंति

कर्णिकारेति सुभागांगी कर्णिकारकुसुमं मुररे: कर्णयोर्निधाय हे सखि गंडमंडलयु
गे तनुरेखं सूक्ष्मरेखायुक्तं चित्रं कस्तूरिकया चित्रमतीवाद्भुतं चकार ॥२०२॥ नासा
भूषणयो: परस्परं विनमयं निरूपयितुमाहुः प्रियेति। प्रमदोत्तमेति विशेषणाद्भग
वन्नासाभूषणस्य स्वामिनीनासायां स्थितमात्रेणानिर्वचनीयेव काचनोत्तमशो
भाविर्भूतेत्युच्यते। एवं शृंगाररचनां निरूप्य तदानींतन स्वरूपावलोकनजन्यभावो
द्रेकेणाष्टत्रां चेष्टां निरूपयंति। ततस्ताद्दगिति। हे शशिवदनि तादृक्रूपं द्रष्ट्वा मुदि
तासती हि प्रियसखि। प्रियमालिंग्य प्रियमुखं चुंबुवा तदास्यो: सर्वेष्वंगेषु हृदि ह
र्षो वा कि हृकुसुखमभवदित्यहं न जाने। तथा प्रणयभरपूर्णस्य नाथस्यापि सर्वांगे
षु हृदि हर्षो वा कि हृकुं तदभवदित्यप्यहं न जाने। तादृशसुखस्य स्वरूपानंदात्मकत्वे

पूर्वकं कथां स
श्रीस्वामिन्या आविर्भूत्तिमित्यारंभ एव प्रतिज्ञातं सप्रत्यर्थयितुं कर्तृनिर्देश पूर्वकं कथां स
माप्तिं निरूपयंति । राधेति । राधाया नित्यसिद्धायाः श्रीचंद्रावल्याः प्रस्तुतवर्णितकथा
१२ याः गोपीनां कृपाः कीर्णां या दासी तया कथितं शृंगाररस एवं मंडनमस्मादादीनां द्र
स्यादि मधुधारण्यो गंभस्यारूपमिदं चरित्रं निकुंज एवावर्ण्यंतत्रैव संपूर्णमभवदि
ति । अमेदं तेषं अत्र गोपिकाजनसमाजे नित्यसिद्धायाः श्री वृषभानुजायाः सखीना
मेकः कदंबः एवं श्रुतिरूप श्रीचंद्रावल्याः सखीनामपरः स एवं कुमारिकासखीना
मन्यः एवमत्र सखीनां समाजत्रयं भवति तत्रैकस्मिन्नेव निकुंजदेशे सर्वसखीनां प
रस्परं समानशीलव्यसनानां संघटनं निगूढसंकेतत्वाघनादिनां संभवती । एवमत्र
समाजत्रये तत्तत्स्वामिनीचरित्रवक्त्रीत्वं तत्समाजस्यांतरंगसख्या एव भवितुं योग्यं १२
तत्र सर्वतं श्रुतिरूपाणां दानचरित्रस्य वक्त्रीत्वं श्री चंद्रावलीसखीनामेव भवितुमर्ह
ति । अत्र राधा सखीत्यादि श्रोत्रीणां संबोधनं च संगच्छते
श्रुतिरूप आगत्य एवात्र चरित्र कथाप्रसंगे राधा सखीत्यादि श्रोत्रीणां संबोधनं च संगच्छते
। तथा तत्तत्सखीनां तत्तत्स्वामिनी निरूपित सहजदासीत्वे प्रियूथत्रितयस्वामि
नीनामपि श्रीमन्नंदराजकुमारस्वरूपैकनिष्ठत्वेन परस्परं मतीव स्निग्धत्वात्सखीत्वं
दस्यापि स्वामिनीत्रितयनिरूपितं दासीत्वं प्राञ्जलमेव सिध्यति । अतः श्रुतिरूपस्वा
मिनीचरित्रवक्त्री एतद्वयसखीनां स्वामिन्यंतरदासीत्वं सूपपन्नमेव । अतः सुष्ठूक्तं
राधाचंद्रावलीगोपीदासीकथितमित्यादि एवं श्रीमत्प्रभुचरणैः अन्यपूर्वाणां श्रुति
रूपश्रीस्वामिनीनां दानलीलाविहारं सुगोप्यमपि लीलास्थजनैष्विव मिथो निरू
पणयोग्यत्वाद्यितद्गतवल्लीलारसिकजनविशेषेषु कृपया स्वात्मसात्कृतेषु एतल्ली

श्रीवर्द्धे
लोनुभवार्थमाविष्कृतमपि सर्वात्मना सर्वप्रभुरेतल्लीलाप्रकरणानुभवसामर्थ्यं
स्वस्यैव नान्यस्येति ज्ञापयितुं स्वहृदय एव स्थापितवंत इतीममर्थं कृपया स्वीयेषु ज्ञा
प्रयंति। इतीति। इत्यात्तिसमाप्तौ प्रकारेण। इति एवं क्रमप्रकारेण दानस्य मिषात् मि
थः स्वामिनी भगवतोः परस्परं विनमयन्यायेन सर्वस्वस्य दानमेव निरूपितं। ततः
श्रीविठ्ठलो निःसाधनस्वजनानुकंपी स्वाशये स्वहृदयांबुजे करोतु स्थापितवान्।
अनेन तदनुग्रहवशात् देवैतदर्थो यथाधिकारं स्फुरिष्यतीति तदनुवृत्तिरेवैतत्फ
लेभ्यं नाम मनोवाक्कायैः कर्तव्येति फलति। मुख्यतल्लीलासाधारणप्रयोजनं वदंतो
दर्शितं लीलायाः सर्वेभ्यः उत्कर्षं च बोधयंति। श्रीमदिति श्रीमहजेशस्य तत्त्विरणा
चकार तदनुचारिणां च वांछितमभिष्टमतः सर्वेषां हृदये धारणावश्यक। चेष ११३

११४ कं। श्रीमद्गोविंदरायश्रीकल्याणधनसेवकः। श्रीमद्धरिधनश्रीदसूक्तिमोत्रोप
जीविकः। तत्पदांभोजमधुपः श्रीमत्तिरिमदाश्रयं यो कृतवान् दानलीलायांवि
वृत्तिं गोकुलोत्सवः॥ ॥इति श्रीमत्सितचरणशरणैकतानगोकुलोत्सवविर
चितं दानलीलाविवरणं संपूर्णं॥ ॥शुभं भूयात्॥ ११४